*pūṣan* = Complete one; *ekarṣe* = Supreme Knowable, also present in the sage Ekarṣi; *yama* = Controller of all, also present in the deity Yama (god of death); *sūrya* = a goal or objective for (even) the deities, also present in Sūrya (god of the sun); *prājāpatya* = as being specially obtained by Prajāpati or Brahmā; *vyūha* = extend; *raśmīn* = the knowledge of my true nature; *tejaḥ* = extrinsic knowledge; *yat* = what, that which; *te* = your; *rūpaṃ* = form; *kalyāṇatamaṃ* = of exceedingly auspicious nature; *tat* = that; *paśyāmi* = I see.

O Pūṣan the Omniscient, Ekarṣi the Supreme Knowable, Yama the controller of all, Sūrya the effulgent and a destination for even the deities, Prājāpatya a special destination for Brahmā; extend the knowledge that is of my true nature, and also knowledge extrinsic to me, so that I may perceive that most auspicious form of yours.

That it is necessary to know the Supreme as being resident in Mukhya-Vāyu, the chief among all *jīva*-s, thus also is indicated —

> *yo'sāvasau puruṣaḥ so'hamasmi* || 17 ||

*yaḥ* = He who; *asau* = in (the deity of) Life (*asau* is the locative singular of *asu* meaning "life"); *asau* = exists; *puruṣaḥ* = the complete person; *saḥ* = he; *ahaṃ* = *aheyaṃ* = unfit for rejection, impossible to avoid; *asmi* = essence, being.

That Perfect Being, who exists in all symbols including Mukhya Prāṇa, the god of Life, and who cannot be avoided (by anyone ever), is the very essence of being (for myself and for everyone else).

N.B. It is not possible to explain this line as expressing identity of the individual with the Supreme, as the word *asmi* uses the *laṭ pratyaya* and would need to express identity in the present tense, per the rule of Pāṇinī, *vartamāne laṭ* (Aṣṭādhyāyī 3.2.123), a sense that is not proposed even by the non-dualists.

At this, the question arises: how may it be said that Viṣṇu of perfect form is the essence of all beings, when beings themselves undergo destruction such as by cremation? Surely, then, their resident would also be destroyed by their destruction? This objection is answered as follows —

> *vāyuranilamamṛtamathedaṃ bhasmāntaṃ śarīram* || 18 ||

*vāyuḥ* = Prāṇa, the god of Life; *anilaṃ* = *aḥ brahmaiva nilaṃ nilayanaṃ yasya, saḥ* = "he whose support is '*a*', i.e., Brahman, alone"; *amṛtaṃ* = free of death; *atha* = now, then; *idaṃ* = this; *bhasmāntam* = ending in fire, subject to (destruction such as) cremation; *śarīram* = body.

Although this body is subject to destruction by fire (or similarly), even so, (even) the deity of Life whose support is Brahman alone, does not himself suffer destruction at any time.

The point being made is that when even the deity of Life does not suffer destruction because of being supported by Brahman, what remains to be said in respect of the latter? It is surely obvious that the latter does not have any destruction Himself.

N.B. The word *vāyu* is oft mistranslated as "wind." Philology tells us that such a meaning is not appropriate, since *vāyu* is a cognate of Latin *vita* meaning "life." Hence, Vāyu is "the god of Life," not "the wind god" as commonly supposed.

Then, the One signified by the *praṇava* is prayed to —

> *Oṃ krato smara kṛtaṃ smara* |
> *Oṃ krato smara kṛtaṃ smara* || 19 ||

*Oṃ* = the *praṇava*, signifying Hari; *krato* = Hari, who art of the form of knowledge; *smara* = be of a disposition to bless; *kṛtaṃ* = good deeds I have done; *smara* = be of a disposition to show favor upon.

O Hari, who art of the form of knowledge, be thou of a disposition to bless me, thy devotee; note thou any good things I may have done (and have compassion for things I have done wrong), and show favor upon me. O Hari, who art of the form of knowledge, be thou of a disposition to bless me, thy devotee; note thou any good things I may have done (and have compassion for things I have done wrong), and show favor upon me.

N.B. In order to show that this attitude must be a constant refrain in the mind of the devotee, the line is repeated.

It has previously been shown that along with *śravaṇa*, etc., in order to obtain realization of what one has obtained a gross understanding of, prayer is also necessary. It is now shown that even after realization is achieved, worship of the Lord is necessary in order to attain liberation. With this intent in mind, the Supreme as present in Agni is worshipped —

> *agne naya supathā rāye asmān viśvāni deva vayunāni vidvān* |
> *yuyodhyasmajjuhurāṇameno bhūyiṣṭhāṃ te nama uktiṃ vidhema* || 20 ||

*agne = añgaṃ dehaṃ, guṇabhūtaṃ jagad vā, nayati prerayati* = O Agni (the Controller of the body, and indeed of the whole universe); *naya* = guide, lead; *supathā* = by the auspicious path; *rāye* = to the wealth (of liberation); *asmān* = us; *viśvāni* = complete, adequate; *deva* = O Deity; *vayunāni* = thoughts, pieces of knowledge; *vidvān* = know; *yuyodhi* = remove, separate; *asmat* = our; *juhurāṇaṃ* = degrading, sinful; *enaḥ* = sin, evil deed; *bhūyiṣṭhāṃ* = fullest, to the utmost, endowed with knowledge and devotion; *te* = unto you; *nama* = praise, salutations; *uktiṃ* = utter; *vidhema* = we do.

O Lord, as 'Agni', you are verily the controller of the body, and even of the whole universe; lead us by the highest path to the wealth of liberation; you fully know all that we know, all the efforts we have made; remove from us the effects of past sinful acts that are causing bondage, thus we pray unto you with our fullest knowledge and devotion.

N.B. This verse is also found as Ṛg Veda I.189-1.

*Oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |*
*pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||*

*Oṃ śāntiḥ śāntiḥ śāntiḥ ||*

*(Keshava Tadipatri & Shrisha Rao)*

## References


[AG21] **Isha Upanishad**. Transl. by Sri Aurobindo (Ghosh). Sri Aurobindo Ashram, Pondicherry. First edition, 1921, reprinted 1965. BL 1120.A5G4 1965.

[BG69] **Sarva-Mūla-Granthāḥ** With the oldest and authentic version of Śrī Hṛṣīkeśa Tīrtha, one of the direct disciples of Śrī Madhvācārya, ed. Bannanje Govindacharya, Akhila Bhārata Mādhva Mahā Maṇḍala, Udupi, 1969. Vol. 1, 1969.
BL1286.292 .M34 A2 1969 v.1

[BNK81] **The History of the Dvaita School of Vedanta and its Literature**
B.N.K. Sharma. 2d rev. ed. Motilal Banarsidass, Delhi, 1981. B132.D8 S5 1981
(N.B. A third edition has appeared as of January 2000.)

[DNS82] **Īśāvāsyopaniṣadbhāṣyaṭīkāmālikā**: A Glossary of All Commentaries of Madhva and His Followers on the Īśāvāsyopaniṣad. Edited with Introduction by D.N. Shanbhag, Karnatak University, Dharwad, 1982.

[DP97] **Upaniṣadbhāṣyam of Śrī Madhwācārya** with the Tīkā of Śrī Jayatīrtha and the Tippaṇī of Śrī Vādirājatīrtha thereon and also with the Khaṇḍārtha of Śrī Rāghavendratīrtha on the seven Upaniṣads. D. Prahladacharya, Ed. Poornaprajna Samshodhana Mandiram, Poornaprajna Vidyapeetha, Bangalore 560028, 1997.

[FMM64] **The Upanishads: Translated by F. Max Müller**. Sacred Books of the East series, volume 1. First Published by the Oxford University Press, 1900, re-printed by Motilal Banarsidass, 1965, 1969, 1975. BL1010.S3.1964 v.1

[FOS33] **A Critical Study of the Īśa Upaniṣad**, Schrader, F.O., Indian Antiquary, 1933, pp. 206-7.

[KTP85] **Īśāvāsya, Taḷavakāra, Kāṭhakopaniṣadaḥ: Ishavasya, Talavakara, Kathaka upanishads: with English translation and notes according to Śrī Madhvācārya's bhāṣya and Śrī Rāghavendratīrtha's khaṇḍārtha**. K.T. Pandurangi, Ed. Chirtanur, Tirupathi : Sriman Madhva Siddhantonnahini Sabha, 1985. BL1124.7 .I762 E5 1985.

[NDS90] **The Commentary of Sri Madhva on Isha and Kena Upanishad: Sanskrit Text with Translation and Explanatory Notes** Sonde, Nagesh D., Ed. Bombay, 1990. BL 1124.7.I766.M3313 1990.

[P74] **Śrī Īśopaniṣad: With Introduction, Translation, and Authorized Purports** by A.C. Bhaktivedanta Swami Prabhupada. Bhaktivedanta Book Trust (ISKCON), Los Angeles, 1974. BL1120.A5B5 1974.

[SCV11] **The Sacred Books of the Hindus: volume 1: Īśa, Kena, Kaṭha, Praśna, Muṇḍaka, and Māṇḍūka Upaniṣads**. Includes Anandatīrtha's comm. on each of the six Upanishads, as translated by Śrīsa Chandra Vasu, Rai Bahadur, 1861-1918. Edited by Major B.D. Basu, I.M.S., retd. Allahabad, 1911. Re-printed by the A.M.S. Press, New York, 1974. BL 1120.A3V37 1911a.

# वर्णानुक्रमसूचिका

| मन्त्र | भा. | खं. | शं. |
|---|---|---|---|
| अग्ने नय सुपथा राये अस्मान् विश्वानि देव | ३५ | ४६ | ५४ |
| अन्धं तमः प्रविशन्ति येऽविद्यामुपासते | २१ | ४१ | ५१ |
| अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते | २३ | ४३ | ५२ |
| अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया | २१ | ४३ | ५२ |
| अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् | २३ | ४३ | ५३ |
| अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् | १२ | ३९ | ४९ |
| असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः | ११ | ३९ | ४९ |
| ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् | ६ | ३८ | ४७ |
| ॐ क्रतो स्मर कृतꣳ स्मर | ३४ | ४५ | ५४ |
| कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः | ८ | ३८ | ४८ |
| तदेजति तन्नैजति तद्दूरे तद्वन्तिके | १४ | ४० | ५० |
| पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् | २६ | ४४ | ५४ |
| यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति | १५ | ४० | ५० |
| यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः | १६ | ४० | ५० |
| योऽसावसौ पुरुषः सोऽहमस्मि | २७ | ४४ | ५४ |
| वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् | ३१ | ४५ | ५४ |
| विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह | २२ | ४२ | ५२ |
| स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ | १८ | ४१ | ५० |

| | | | |
|---|---|---|---|
| सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह | २४ | ४३ | ५३ |
| हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् | २५ | ४३ | ५३ |

# अत्र स्वीकृताः सङ्केताः

भा. - श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं भाष्यं

खं. - श्रीराघवेन्द्रयतिविरचितः खण्डार्थः

शं.- श्रीशङ्करभगवतः कृतं भाष्यं

ॐ श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

# ॥ श्रीयाज्ञीयमन्त्रोपनिषद्भाष्यम् ॥

ॐ ॥ नित्यानित्यजगद्धात्रे नित्याय ज्ञानमूर्तये ।
पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ॥

श्रीमद्भावीसमीरवादिराजपूज्यपादविरचिता

## ॥ ईशावास्योपनिषद्भाष्यटीकाप्रकाशिका ॥

हयास्यं व्यासकृष्णौ मां प्राणं वाणीं गुरूनपि ।
प्रणम्य वादिराजाख्ययतिना तदनुग्रहात् ॥

ईशावास्योपनिषदो भाष्यटीकाप्रकाशिका ।
क्रियते ह्रियते दुर्वाग्गर्वान्धतमसं यया ॥

श्रीमज्जयतीर्थभिक्षुविरचितं

## ॥ याज्ञीयमन्त्रभाष्यविवरणम् ॥

यज्ञं यज्ञभुजं प्राज्ञं पूर्णप्रज्ञमुनीश्वरम् ।
मनोज्ञगुणमासेवे सुज्ञानदमहर्निशम् ॥१॥

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भयां लोचनालिभ्यां भगवान् पातु नो हरिः ॥२॥

वा.प्र.॥ ईशावास्योपनिषद्भाष्यटीकां चिकीर्षुः जयतीर्थमुनिः उपनिषदुक्तगुणवत्तया प्रतिपाद्यदेवतायाः सेवारूपं मङ्गळमाचरति — “यज्ञम्” इति । “यज्ञम्” इति वदता, स्वायम्भुवमनोः दौहित्र

आकूतीसूनुः यज्ञनामा हरिर्देवतेति सूचितम् । मनुना स्वदृष्टमन्त्रैस्तस्यैव स्तुतत्वात् । “यज्ञभुजम्” इति “तस्मिन्नपो मातरिश्वा दधाति” इत्यस्यार्थकथनम् । “अप्”पदोपलक्षितसर्वयज्ञादिकर्मणां सकलप्राणिप्रकृष्टचेष्टाहेतुतया “प्राण” पद वाच्येन वायुना हरावर्पितत्वस्योक्तत्वात् । “अन चेष्टायाम्” इति धातोः प्रकृष्टे “कर्मण्यनयति चेष्टयति” इति व्युत्पत्त्या प्रकृष्टचेष्टाहेतुर्हि प्राणः । “टुओश्वि गतिवृद्ध्योः” इति धातोः, ‘मातरि सर्वप्रमातरि हरौ सर्वकर्मणामर्पणरूपा गतिर्यस्मात्स हि मातरिश्वा’ । “कविर्मनीषी” इत्यत्रोक्तसर्वज्ञत्वापरपर्यायकविशब्दार्थकथनं “प्राज्ञम्” इति । प्रज्ञासम्बन्धी हि प्राज्ञः । ‘प्रकर्षेण आ समन्तात् जानाति’ इति प्राज्ञः । यद्वा “मातरिश्वा” इत्यत्रोक्तमातृपदार्थसूचनाय इदम् । “पूर्णप्रज्ञमुनीश्वरम्” इत्यपि ‘मातरिश्वा गतिरवगतिर्यस्य’ इति व्युत्पत्त्या सिद्धमातरिश्वपदार्थसूचनम् । मातरिश्वनः पूजकत्वोक्त्या मातरिश्वना पूज्यत्वोक्त्या हरेः पूर्णप्रज्ञेश्वरत्वमपि तत्रैव सूचितम् । “मनोज्ञगुणम्” इत्यनेन पदेन “अनेजदेकम्” इत्यादेः अर्थकथनम् । “सुज्ञानदम्” इति “ततो न विजुगुप्सत” इत्यस्यार्थकथनम् । ततो भगवद्दत्तज्ञानेन स्वकीयतया भुवनस्य प्राग् ज्ञातत्वात् । आत्मानं विशेषेण स्वयम् “गुपू रक्षणे”, इति धातोर्गोप्तुं नेच्छतीति स्वोपासकाय ज्ञानदानस्यार्थत उक्तत्वात् । “अहर्निशम्” इति च “कुर्वन्नेवेह कर्माणि” इत्यस्य फलितार्थकथनम् । भगवत्यादरात् सकलवाङ्मनसदेवताया रमाया अपि उपसर्जनतया स्मरणाय पुनरप्याशीर्वादरूपं मङ्गळमाचरति “श्रीमद्” इति । अलिरपि पुष्पसौरभं दूरत आघ्राय तदन्तिकमायाति । भगवल्लोचनाली तु श्रीमुखसौन्दर्याख्यसौरभलोभात् प्रतिक्षणमायाति, इति भावः ।

ज.टी. ॥ काण्वीं मन्त्रोपनिषदं[1] यथावद् व्याकरिष्यन् भगवानाचार्यः चिकीर्षिताविघ्नपरिसमाप्त्यादिप्रयोजने तत्प्रतिपाद्यदेवतास्तुतिनती प्रथमं निबध्नाति — “नित्य” इति । ‘सर्वयज्ञभुज इति सर्वयज्ञभोक्तृत्वात्, यज्ञनाम्न’ इत्यर्थः । ‘यथोक्तं सुखरूपस्य भोक्तृत्वाद्’ इति ।

‘अपूर्णसुखाः सुखार्थं भोगान् भुञ्जते, किं तथा हरिरपि?’ नेत्याह — “पूर्णानन्दाय” इति । ‘भोगास्तु लीलया’, इति भावः । पूर्णानन्दत्वं हरेः कुतः? इत्यत आह — “जगद्धात्र” इति । तदुक्तं

[1] अष्टमस्कन्धे ईशावास्यादिमन्त्रान् याख्याय, “इति मन्त्रोपनिषदं व्याहरन्तम्” (भा.पु. ८.१.१७) इत्युक्तत्वात् मन्त्रोपनिषदमित्युक्तम् । मन्त्रत्वे सत्युपनिषदमित्यर्थः । — गूढकर्तृका भाष्यटीकाटिप्पणी

“को ह्येवान्याद्” (तै.उ. २.७) इत्यादि । धातृत्वं च अनित्यानां एव, न तु नित्यानां, अनाधेयातिशयत्वाद्, इति नाऽशङ्कनीयमिति भावेन आह — “नित्यानित्य” इति । “नित्यं नित्यात्मना यतः” इत्यादेः । अशरीरस्य न जगद्धातृत्वं, शरीरित्वे मरणं स्याद्? इत्यत आह — “ज्ञानमूर्तये नित्याय” इति । ‘मूर्तिमत्त्वात् जगद् धातृत्वोपपत्तिः । तस्याश्च मूर्तेर्ज्ञानाद्यात्मकत्वेन नित्यत्वोपपत्तिः’ इति । वक्ष्यते चैतत्सर्वं “याथातथ्यतोऽर्थान् व्यदधात्” (ई.उ. ८), “वायुरनिलममृतम्” (ई.उ. १७), “यत्ते रूपं कल्याणतमम्” (ई.उ. १६), “स पर्यगाच्छुक्रम्” (ई.उ. ८), “तस्मिन्नपो मातरिश्वा दधाति” (ई.उ. ४) इत्यादि । देवताप्रणामानन्तरं गुरुप्रणामः कर्तव्यं इति शिष्यान् ग्राहयितुं गुरुत्वेनापि हरिं प्रणमति, “यस्माद्” इति ।

वा.प्र.॥ “चिकीर्षिताविघ्नपरिसमाप्त्यादि” इत्यत्र “तं हासुरा ऋत्वा विदध्वसुः” (छा.उ. १.२.७) इति श्रुत्युक्तवायुरूपपूर्णप्रज्ञस्य विघ्नाभावपरिसमाप्त्योः स्वतः सिद्धत्वात् भगवत्प्रसादाख्यफलस्य सम्भावितविघ्नध्वंसस्य शिष्यप्रशिष्यादिषु प्रचयाख्यफलस्य च सूचनाय “आदि” पदम् । अत्र नम्यत्वोपपादकनित्यानित्यजगद् धातृत्वादिगुणानां वस्तुगत्या स्तुतिरूपत्वेन मङ्गळत्वाच्च “स्तुतिनती” इत्युक्तम् । एवमन्यत्राप्यूह्यम् । “सर्वयज्ञभोक्तृत्वाद्यज्ञनाम्न” इत्यनेन ‘यजनं यज्ञ’ इति भावव्युत्पत्तिर्नात्राभिप्रेता, किन्तु ‘इज्यत इति यज्ञ’ इति कर्मव्युत्पत्तिरेव सूचिता । कर्तुं, अकर्तुं, अन्यथा कर्तुं समर्थस्य हरेर्नित्यनाशकत्वशक्तिरप्यस्ति, इत्यतो “नित्यं नित्यात्मना यत” इत्युक्तम् । “ज्ञानाद्यात्मकत्वेन” इति वदता ‘मनःपरिणामरूपज्ञानस्य त्रिक्षणावस्थायित्वेऽपि करचरणाद्यात्मकज्ञानस्य विलक्षणत्वात् नित्यत्वमेव सम्भावितम्’, इति सूचितम् । “याथातथ्यतोऽर्थान् व्यदधाद्” इत्यनेन नित्यानित्यजगद्धातृत्वमुक्तं भवति । यथा यथा प्रतीयते, तथा तथा विद्यमानं हि यथातथम् — तस्य भावश्च याथातथ्यम् । एवं च बहुकालस्थायिक्षित्याद्यर्थान् सृष्ट्वा स्थापयति इत्यपि सिद्धम् । न तु सृष्टिमात्रकथनमिदम्, अतो जगद्धातृत्वमपि उक्तं भवति ।

“वायुरनिलममृतम्” इत्यत्र “अमृत”पदेन नित्यत्वं उक्तम् । “यत्ते रूपं कल्याणतमम्” इत्यनेन ज्ञानमूर्तित्वं उक्तं भवति । “अकायमव्रणम्” इत्यादिना व्रणादियोग्यप्राकृत कायराहित्यमुक्त्वा “यत्ते रूपं कल्याणतमम्” इति पुनः कल्याणतमत्वं वदन्ती ज्ञानाद्यात्मिकामेव मूर्तिमभिप्रैतीति मूर्तेर्ज्ञानाद्यात्मकत्वं कथं

न सिद्ध्येत्? “स पर्यगाच्छुक्रम्” इत्यत्र “शुक्र”पदोक्त शोकराहित्योपपादनाय पूर्णानन्दत्वं च श्रुतेः कथं नाभिप्रेतम्? अपूर्णानन्दानां जीवानां शोकसद्भावदर्शनात् । “तस्मिन्नपो मातरिश्वा दधाति” इत्येतत्सर्वयज्ञभोक्तृत्वार्थकतया पूर्वमेव व्याख्यातम् ।

यस्माद् ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च ।
ज्ञानस्फूर्तिः सदा तस्मै हरये गुरवे नमः ॥

स्वायम्भुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव —

“स्वायम्भुवः स्वदौहित्रं विष्णुं यज्ञाभिधं मनुः ।
ईशावास्यादिभिर्मन्त्रैस्तुष्टावावहितात्मना ।
रक्षोभिरुग्रैः सम्प्राप्तः खादितुं मोचितस्तदा ।
स्तोत्रं श्रुत्वैव यज्ञेन तान् हत्वाऽवध्यतां गतान् ।
प्रादाद्धि भगवांस्तेषामवध्यत्वं हरः प्रभुः ।
तैर्वध्यत्वं तथाऽन्येषामतः कोऽन्यो हरेः प्रभुः” ॥

— इति ब्रह्माण्डे । भागवते चायमर्थ एवोक्तः (चायमेव अर्थ उक्तः) ।

ज.टी. ॥ ‘ब्रह्मादीनामप्राप्तज्ञानमुत्पद्यते श्रियस्तु सर्वदा विद्यत’, इति सूचयितुं “श्रियोऽपि” इति पृथग् ग्रहणम् । चशब्दोऽवधारणे । “यस्माद्” इत्यनेन सम्बद्ध्यते । “ज्ञानस्फूर्तिः” ज्ञातव्यार्थप्रतिभा । यथायोगं (यथायोग्यं) क्रियाध्याहारः — “यो ह वा अविदितार्षेच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति याजयति अध्यापयति वा स्थाणुं वर्च्छति गर्ते वापद्यते प्रवामीयत” इति श्रुतेर्देवतादिज्ञानवत एव विद्या फलतीति ज्ञायते । तत्र ब्राह्मणपदोपलक्षितार्थज्ञानं व्याख्यानादेव भविष्यति । छन्दोज्ञानं तु अक्षरगणनया सुकरमेव । ऋषिदेवते तु ज्ञापयन्नाह — “स्वायम्भुव” इति । व्याचिकीर्षितत्वेन बुद्धौ प्रकृतत्वादेतैरित्युक्तम् । मूर्त्यन्तरं विहाय यज्ञस्य स्तुतौ किं कारणमित्यतो विशेषतः स्वसम्बन्धमाह “आकूतीसूनुम्” इति । “भगवन्तम्” इति पूजार्थम् । कुत एतदवगम्यत, इत्यत आह, “स्वायम्भुव” इति । अवहितात्मना सावधानेन मनसा । यद्यप्यसौ स्वपरमोक्षार्थं तुष्टाव । तथाऽप्यवान्तरमस्य फलान्तरं सिद्धं, इत्याह “रक्षोभिः” इति । ‘तदा स्तुतिकाले स्तोत्रं श्रुत्वैव तदसहमानैः रक्षोभिः खादितुं सम्प्राप्तो यज्ञेन तेभ्यो मोचित’, इत्यर्थः । तान् राक्षसान्

इत्यध्याहारेण पुल्लिङ्गोपपत्तिः । अवध्यत्वे कारणमाह — "प्रादाद्धि" इति । 'ननु, बाधने कथं तेषां शक्तिः' इत्यत आह "तैः" इति । "अन्येषां तैर्वध्यत्वम्" इति तेषामन्यवधे सामर्थ्यमित्यर्थः । तथाशब्दो वरसमुच्चये । 'यत एवं हरिः शिववरमपि अतिक्रान्तवान्, अतो हरेरन्यः को नाम प्रभुः समर्थः? किन्तु हरिरेव', इत्यर्थः ।

अत्र प्रमाणान्तरमाह — "भागवते च" इति । 'ईशावास्यादिमन्त्राणां योऽर्थो वक्ष्यते अयमेव भागवतेऽष्टमादौ उक्तः । तत्र च मनुः स्तोता, यज्ञनामा विष्णुः स्तुत्य, इति स्पष्टं प्रतीयते[2] तत्समाख्यानादत्रापि तयोरेव ऋषिदेवतात्वं ज्ञायत', इति भावः । अनेन उपनिषदो अधिकारि, विषय, प्रयोजन, अभिसम्बन्धोऽपि दर्शितो भवति । मन्वादीनामधिकारिणां यज्ञनाम्नो विष्णोर्विषयस्य मोक्षस्य प्रधानस्य रक्षोनिरसनस्याप्रधानस्य च प्रयोजनस्य सूचितत्वात् । 'अतो, युक्तमेतदुपनिषदो व्याख्यानं, गहनार्थत्वाच्च' — इति ।

वा.प्र.॥ "ब्रह्मादीनामप्राप्तज्ञानमुत्पद्यत" इत्यत्र 'आलोचने सर्वविषयकज्ञानवतो ब्रह्मणः, कथमप्राप्तज्ञानम्?' — इति नाऽशङ्कनीयम्, अनालोचनदशायामप्राप्तज्ञानस्यापि सम्भवात् । प्रवाहतो नित्यस्य मनोवृत्तिरूपज्ञानस्यानित्यत्वेन पूर्वपूर्वप्रज्ञान उत्पत्तिकाले उत्तरोत्तरज्ञानस्याप्राप्तत्वावश्यम्भावाच्च । ब्रह्मादिषु भवेदिति क्रियाध्याहारः, लक्ष्म्यां तु स्पष्टीभवेदिति क्रियाध्याहार इति भावेनाऽह "यथायोग्यम्" इति । "अविदितार्षच्छन्द" इत्यत्र "आर्ष"पदेन ऋषिसम्बन्धः कथ्यते । "ब्राह्मणपदोपलक्षितार्थज्ञानम्" इत्यत्र ब्राह्मणपदं हि संहितायाष्टीकावाचकम् । टीका च 'अर्थज्ञानोत्पादनायेत्यतो ब्राह्मणपदमर्थज्ञानोपलक्षकम्' इति भावः । "स्थाणुं वच्छति" इत्यत्र भावप्रधानो निर्देशः । स्थाणुं स्थाणुत्वमित्यर्थः । "गर्त"पदेन भूगर्तरूपो नरकः कथ्यते । "प्रवामीयत" इत्यस्य "व्यत्ययो बहुळम्"

---

[2] "अष्टमादौ" अष्टमस्याध्याये । "अत्र" इति "स्वायम्भुवो मनुर् एतैर्मन्त्रैर्" इत्युक्तार्थे । ननु भागवते "आत्मावास्यमिदं सर्वम्" (भा.पु. ८.१.१०) इत्यादिना ईशावास्यादिमन्त्रार्थकथनेऽपि "स्वायम्भुवो मनु यज्ञं तुष्टवेत्यर्थप्रतीतेः कथमेतत्? 'तत्र प्रमाणान्तरम्' इत्यत आह — "तत्र च" इति । "विरक्तः कामभोगेषु शतरूपापतिः प्रभुः । तप्यमानस्तमा घोरमिदमन्वाह भारत" (भा.पु. ८.१.७) इति मनोस्तोतृत्वम् । "आख्यास्ये भगवान् यज्ञो यच्कार कुरूद्वह" (भा.पु. ८.१.६) इत्यादिना यज्ञस्य स्तुत्यत्वं स्पष्टं प्रतीयत इति ध्येयम् — श्रीमद्युपत्याचार्यशिष्य श्रीश्रीनिवासाचार्यकृतं व्याख्यानम्

(अष्टा. ३.१.८५) इति वचनात्, 'प्रमीयते वा म्रियते वा', इत्यर्थः ।
यद्यपि "भगवत्"शब्दः षड्गुणैश्वर्यवाची, तथापि
'गुरुभूतमातामहेन कथं लघुभूतो दौहित्रः स्तूयत?', इति
शङ्कावारणाय दौहित्रोऽप्ययं हरेरवतारत्वात् पूज्य इत्यर्थसूचनाय
"भगवन्तम् इति पूजार्थम्" इत्युक्तम् । खादनार्थं
प्रागनागतरक्षसामिदानीमागमने हेतुसूचनाय "स्तोत्रं श्रुत्वैव
तदसहमानैः" इत्युक्तम् । भगवतस्तु मनोः स्वमातामहत्वात्
तददनार्थमागतानां अनादिवैरिणां रक्षसां हननं न स्तोत्रश्रवणसापेक्षं,
इति भावः । शिवेनान्येषां राक्षसैः वध्यत्ववरे दत्ते सर्वेषां
वधोऽपि स्यादेव । न च सर्ववधो दृश्यते । "अतोऽन्यवधे
सामर्थ्यम्" इत्युक्तम् । "अत्र प्रमाणान्तरमाह" इत्यत्र
अत्र मनो ऋषित्वे यज्ञस्य देवतात्वे च प्रमाणं समाख्यारूपमित्यर्थः ॥

**ॐ ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥**

ईशस्य (आ)वासयोग्यं, "ईशावास्यम्" । "जगत्याम्" प्रकृतौ ।
"तेन" ईशेन, "त्यक्तेन" दत्तेन, "भुञ्जीथाः" ।

> "स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदं जगत् ।
> प्रवृत्तये प्रकृतिगं यस्मात् स प्रकृतीश्वरः ।
> तदधीनप्रवृत्तित्वात् तदीयं सर्वमेव यत् ।
> तद्दत्तेनैव भुञ्जीथा अतो नान्यं प्रयाचयेद्" ॥

— इति ब्राह्मे (ब्रह्माण्डे) ॥१॥

ज.टी. ॥ उपदिष्टमपि तत्त्वं अधिकारिण एव हि हृदये अवतिष्ठते, नान्यस्य, इति तत्त्वं विवक्षुरुपनिषदधिकारसिद्ध्यर्थं विच्छिन्नतृष्णत्वं तावदाद्येन मन्त्रेण सोपपत्तिकं विधत्ते । तत्र "ईशावास्य"पदं दुर्गमार्थत्वाद् व्याख्याति — "ईशस्य" इति । अनेन 'आवासमर्हतीत्यावास्यं ईशस्याऽवास्यं ईशावास्यम्' इत्युक्तं भवति । "जगत्याम्" इत्येतत् "पृथिव्याम्" (शं.भा. १) इत्यन्यथाप्रतीतिनिरासाय व्याचष्टे — "जगत्याम्" इति । "तेन" इति परामर्शस्य विषयो न प्रतीयते त्यक्तस्य च भोगसाधनत्वमयुक्तमतो दुर्गमार्थं तृतीयपदं व्याख्याति "तेन" इति । समासे उपसर्जनीभूतस्यापि ईशस्य बुद्ध्या विवेकेनायं परामर्श, इति भावः । पूर्वार्धोक्ततात्पर्यपरामर्शश्चायं, इति ज्ञातव्यम् ।

ततश्चायं मन्त्रार्थः — 'यत्किञ्च जगदिदं तत्सर्वं प्रवृत्त्यर्थं आत्मानं ईशस्याऽवासमर्हति' इति तावत् "तदेवानुप्राविशद्" (तै.उ. २.६.१) इति श्रुतिप्रसिद्धम् । तेन ज्ञायते स्वयमिदं प्रवृत्तावशक्तं, परमेश्वराधीनं, इति । किं च जगत्यां प्रकृताविदं सर्वमाश्रितं, इत्येतत् "आकाश एव तदोतं च प्रोतं च" (बृ.उ. ३.८.७) इति श्रुतिसिद्धम् । प्रकृतिश्च परमेश्वराधीना, "एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" (बृ.उ. ३.८.११) इत्यादिश्रुतेः । ततोऽपि सर्वमस्वतन्त्रं, परमेश्वराधीनं, इति विज्ञायते । यत एवमीश्वर एव स्वतन्त्रस्तेन कारणेन "तेन" ईशेन, "त्यक्तेन" दत्तेन वित्तेन — 'यदृच्छया लब्धेन' इति यावत्, "भुञ्जीथाः" भोगं कुर्याः । यतश्च ईशादन्यदस्वतन्त्रं तेन तस्य दाने सामर्थ्याभावात् "कस्यस्वित्" कस्यापि राजादेः सकाशात् धनं "मा गृधः" — मा काङ्क्षेथाः ।

मन्त्रार्थस्थापनाय स्मृतिसमाख्यामाह "स्वत" इति । स्वतः प्रवृत्त्यशक्तत्वादेवेदं जगत् प्रवृत्तय "ईशावास्यम्" । अन्यथा, तन्न स्यात्? अत ईशावास्यत्वात् स्वतः प्रवृत्त्यशक्तमीशाधीनम् । किं च यस्मादिदं प्रकृतिगं यस्माच्च विष्णुः प्रकृतीश्वरस्ततोऽपि । यद्यस्मादेवमुक्तप्रकारेण तदधीनस्वरूपत्वात् सर्वं वित्तं तदीयमेव, अतस्तद्दत्तेनैव "भुञ्जीथाः" । अतः, 'परमेश्वरादन्यं न प्रयाचेत भवान्' — इत्यर्थः ॥ १॥

वा.प्र.॥ यद्यपि तेनेशावास्यमित्यत्रोक्तेन "ईशेन" इति परामर्शो युज्यते । तथापि तत्पदस्य यत्पदसापेक्षत्वमभिप्रेत्योक्तं "बुद्ध्या विवेकेन" इति । 'य ईशः तेन इति परामर्श' इति भावः । यद्यपि "तत्सृष्ट्वा तदेवानुप्राविशद्" (तै.उ. २.६.१) इति श्रुतौ प्रवेशमात्रमुच्यते । तथाऽपि स्वभावत एव सर्वत्र व्याप्तस्य सृष्ट्यनन्तरं स्वसृष्टवस्तुषु पुनः प्रवेशस्तत्प्रवर्तनार्थम्, इति भावः । अव्याकृताकाशस्य प्रकृत्यात्मकत्वात् प्रकृतिस्वामिकत्वात् "आकाश एव तदोतं प्रोतं च" (बृ.उ. ३.८.७) इति श्रुतौ "आकाश"पदेन प्रकृतिरेवोच्यत, इति भावः । "नान्यं प्रयाचयेद्" इति भाष्ये 'स्वयं न याचेत, अन्यमुखेन याचयेद्' इति भ्रमनिवारणाय, "स्वार्थिको णिज्" इति भावेनोक्तं — "न प्रयाचेत भवान्" इति ।

अन्यथा निर्व्यलीकवैराग्याभावप्रसङ्गात् । "मा गृधः कस्यस्विद्धनम्" इति मूलश्रुतिविरोधाच्च ॥ १॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २॥

'अकुर्वतः कर्म न लिप्यत', इति नास्ति ।

"अज्ञस्य कर्म लिप्येत कृष्णोपास्तिमकुर्वतः ।
ज्ञानिनोऽपि यतो ह्रास आनन्दस्य भवेद्ध्रुवम् ।
अतोऽलेपेऽपि लेपः स्यादतः कार्यैव सा सदा" ॥

— इति नारदीये ॥ २॥

ज.टी. ॥ 'तृष्णाविच्छेदवत्, स्वोचितकर्मानुष्ठानमप्यावश्यकं ज्ञानार्थिनाम्', इत्येतत्, "कुर्वन्नेव" इति द्वितीयमन्त्रेण विधत्ते । तत्र "नान्यथेतोऽस्ति" इत्येतद्दुर्गमार्थत्वाद् व्याख्याति, "अकुर्वत" इति ।

ततश्चायं मन्त्रार्थः — "शतं समाः", शतं वर्षाणि, इह मानुषादिजन्मनि यज् "जिजीविषेत्", जीवितुमिच्छेत्, तत्कर्माणि स्वोचितानि "कुर्वन्नेव" आमरणं भगवत्पूजात्मकान्यसङ्कल्पितफलानि स्वोचितानि कर्माणि सर्वथा कुर्याद्, इति यावत् । कुतः एवं कर्माणि कुर्वति, नरे मनुष्यमात्रेऽपि त्वयि "कर्म" पापं "न लिप्यते" । 'स्वोचितेन असङ्कल्पितेन फलेन कर्मणा भगवत्पूजां कुर्वन्तं, अल्पाधिकारिणमपि न प्रागुत्तराणि कर्माणि पापानि बाधन्ते । ततश्च ज्ञानाधिकारी स भवति', इति यावत् । इतः कर्मकरणात् । अन्यथा "कर्म न लिप्यत" इति नास्ति । भगवत्पूजामकुर्वन्तं पापानि बाधन्त एव । ततश्चासौ ज्ञाने नाधिक्रियते, अशुद्धचित्तत्वात् । अतः, कर्माणि कार्याणि — इति ।

अपरे व्याचक्षते — ज्ञानिनः सर्वकर्मत्यागः पूर्वमन्त्रेण विहितः । यथा "ईशा" ईशित्रा परमेश्वरेण "यत्किञ्च जगत्यां" पृथिव्यां जगदिदं तत्सर्वं "वास्यम्" आच्छाद्यम् । "तेन" कारणेन "त्यक्तेन" सर्वकर्मत्यागेन भुञ्जीथाः पालयेथाः । एवं त्यक्तेषणस्त्वं "कस्यस्विद्धनं" "मा गृधः", मा काङ्क्षीः । अथ वा, "मा गृधः" कस्मात् "कस्यस्विद्धनं", न कस्यापि । 'अतो मिथ्याविषये बुद्धिं मा कार्षीः', इति । 'यस्तु नरमात्रोऽल्पज्ञस्तं प्रति कर्मानेन मन्त्रेण उच्यते' — इति ।

तदनुपपन्नम् — 'अज्ञवज्ज्ञानिनोऽपि भगवत् पूजात्मकस्वकर्माकरणे पापलेपसद्भावेन

द्वाभ्यामपि तत्कर्तव्यतायाः स्मार्तत्वाद्', इति भावेन आह, "अज्ञस्य" इति ।
'कृष्णोपास्तिं स्वकर्मणा' इति शेषः । 'नियतमोक्षत्वेन कर्मणामकिञ्चित्करत्वादलेपस्य ज्ञानिनः कुतः कर्मलेपः?' इत्यत आह, "यत" इति । 'ह्रासो भवेत्, कृष्णोपास्त्यकरणनिमित्तपापेन' इति शेषः । यतो ह्रासो भवेद्, अतो मोक्षप्रच्युतिरूपलेपरहितेऽपि ज्ञानिनि कर्मलेपः स्यादेव । 'यत एवमुभयोर्लेपोऽतो द्वाभ्यामपि सा कृष्णोपास्तिः कार्यैव' — इत्यर्थः ।

असङ्गतं च तस्येशाच्छाद्यत्वकथनम् । न हि तत् कर्माकरणे हेतुः? तथा सति, अज्ञस्यापि तत्प्रसङ्गेन उत्तरमन्त्रविरोधात् । ईशावास्यत्व ज्ञानोपलक्षणपक्षेऽपि असङ्गतिरेव । न हि 'जगद् ईशावास्यम् इति जानता, कर्म न कार्यम्', इति नियमोऽस्ति? 'अद्वैतज्ञानमनेन उपलक्षितम्' इति चेत्? न, विरोधात् । नि हि आच्छाद्याऽच्छादकयोर् अभेदो दृष्टपूर्वः । सर्वमपीशावास्यमङ्गीकुर्वताऽवश्यं "जगती"पदस्य सर्वोपलक्षणत्वमङ्गीकर्तव्यम् । ततो वरं प्रकृतिवाचकत्वग्रहणमेव, सर्वार्थलाभात् । न च तत्पक्षे अस्योपयोगोऽस्ति । "भुञ्जीथा" इत्यस्य पालनार्थतायामात्मनेपदविरोधः । धनमिथ्यात्वं च प्रत्यक्षादिविरुद्धम् — इति ॥ २॥

वा.प्र.॥ "न प्रागुत्तराणि कर्माणि पापानि बाधन्त" इत्यस्य 'निरन्तरभगवत्पूजाया अपि सकलपापप्रायश्चित्तरूपत्वाद्' इति भावः । "न हि जगदीशावास्यमिति जानता" इत्यत्र रात्रौ तमसाऽह्नि हिमान्या च जगत आच्छाद्यत्वं जानताऽपि सन्ध्यावन्दनादिकर्मकरण दर्शनाद्, इति भावः । "अद्वैतज्ञानमनेनोपलक्ष्यत" इत्येतदपि न प्रकृतोपयोगि । अद्वैतज्ञानवता मायावादिना आचार्येणैव जपादिकर्मणां क्रियमाणत्वात् । अङ्गीकृत्य दूषणान्तरमाह — "न हि" इति । "न च तत्पक्षेऽस्योपयोगोऽस्ति" इत्यस्य ईशाच्छाद्यस्वर्गाद्यर्थं तैरपि यज्ञादेः क्रियमाणत्वादिति भावः । "भुजोऽनवन" (अष्टा. १.३.३६) इत्यवनार्थे आत्मनेपदनिषेधादिति भावेनाह "आत्मनेपदविरोध" इति ।

किं च 'ईशा ईशित्रा आच्छाद्यं जगद्' इति च न मायावादिना वक्तुं शक्यते, 'ईश्वरो मायया अविद्यमानमेव जगद्दर्शयति' इति हि तन्मतम् । कथमन्यथा दृश्यत्वेन मिथ्यात्वं वदेत्? अपि च रक्षसा रसातळे आच्छादितजगतः वराहरूपिणा भगवता आच्छादकजलादुद्धृत्य प्रकाशितत्वाच्च कथमीशाच्छाद्यत्वम्? "तमेव भान्तमनुभाति सर्वम्" (श्वे.उ. ६.१४, मु.उ. २.२.११) इति च तत्पक्षः । अतोऽपि नेशाच्छाद्यत्वम् ।

किं च —

“यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्” ॥
(भ.गी. १५.१२)

— इति गीतायां जगदीशेन कृष्णेनैवोक्तत्वात्, कथमीशाच्छाद्यं जगत्? अतो “यत्किञ्चिद्” एतत् ।

प्रत्युत “तदव्यक्तमाह हि” (ब्र.सू. ३.२.२३), “यत्तदद्रेश्यमग्राह्यम्” (मु.उ. १.१.६), “अदृश्यत्वादिगुणको धर्मोक्तेः” (ब्र.सू. १.२.२१), “मायायवनिकाच्छन्नमहिम्ने ब्रह्मणे नमः” इत्यादिश्रुतिस्मृतिभ्यः, स्वमते ब्रह्मैव आच्छाद्यम् । ब्रह्मणो जगदारोपाधिष्ठानत्वाङ्गीकाराच्च स्वप्रक्रियया ब्रह्मैव आच्छाद्यम् । एवं च ईशाच्छाद्यत्वेन त्यागे ब्रह्मण एव त्यागप्रसङ्गः, न तु कर्मणः । अतोऽपि स्वाज्ञानविजृम्भितमेवेदं व्याख्यानम् ।

अपि च जगदीशाच्छाद्यं चेत् कर्म कुतः त्याज्यम्? ‘कर्मणोऽपि जगदन्तःपातित्वाद्’ इति चेत् तर्हि मोक्षसाधनमनोवृत्तिरूप अपरोक्षज्ञानस्यापि तत एवोपेक्ष्यत्वं स्यात्? किं च इन्द्रवाय्वादिरूपतया महाज्ञानिभिः पाण्डवैरेव महता प्रयत्नेन राजसूयाश्वमेधादिकर्मणां कृतत्वात्कथं ज्ञानिना कर्म त्याज्यम्? किं च महाज्ञानिनं पार्थं प्रति “कर्मण्येवाधिकारस्ते मा फलेषु कदाचन” (भ.गी. २.४७) इति निवृत्तरूपकर्मण्येव ज्ञानिन एवाधिकारस्योक्तत्वात् । अनेनैव ‘क्वचित् कर्मणां त्याज्यत्वोक्तिः काम्यकर्मणामेव’ इति सूचितम् —

“नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात् तस्य परित्यागः तामसः परिकीर्तितः” ॥

(भ.गी. १८.७) इति सन्ध्यावन्दनादिकर्मणामत्याज्यत्वस्यैव भगवता कथनाच्च । “पालयेथा” इत्यत्र पालनविषयतया कर्म च न परेण वक्तुं शक्यम् । ईशाच्छाद्यसकलजगतामुपेक्षणे सति आत्मैव ह्युर्वरितः एव च स्वात्मानमेव त्वं पालयेथा इत्युक्तं स्यात्? तच्च कर्तृकर्मभावविरोधान्नित्यस्यात्मनः पाल्यत्वायोगाच्च अयुक्तम् । अतो, ‘मर्कटः स्वकरगतरत्नमालाया इव उपनिषदामपकर्तैव परो, न व्याकर्ता’ इति युक्तमुत्पश्यामः ॥ २॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३॥

सुष्ठु रमणविरुद्धत्वाद्, असुराणां प्राप्यत्वाच्च "असुर्याः" ।
"न च (खलु[3]) रमन्त्यहो असदुपासनयाऽऽत्महनः" (भा.पु. १०.९४.२४)
इत्युक्तत्वात् ।

"महादुःखैकहेतुत्वात् प्राप्यत्वादसुरैस्तथा ।
असुर्या नाम ते लोकास्तान् यान्ति विमुखा हरौ" ॥

— इति वामने ।

"ये के च" इत्यनेन नियम उक्तः ।
"नियमेन तमो यान्ति सर्वेऽपि विमुखा हरौ (हरेः)" इति च ॥ ३॥

ज.टी. ॥ एवं प्राप्ताधिकारं प्रति परमात्मतत्त्वबुभुत्साजननाय "असुर्या" इति मन्त्रेण अपरमात्मविदां निन्दा क्रियते । तत्र "असुर्या" इत्यस्य वर्णविपर्ययेण 'असुर्याः सूर्यप्रकाशहीना' इति अन्यथाप्रतीतिनिरासाय अर्थमाह — "सुष्ठु रमण" इति । 'सुष्ठु रमणं सुखं सुर्यं, तद्विरुद्धमहादुःखत्वादसुर्या', इत्यर्थः । 'असुराणां प्राप्यत्वाद्' इत्यनेन सकलसुखराहित्यमुपलक्ष्यते । 'कुतोऽयं "असुर्य"पदार्थ?' इत्यत आह, "न च" इति । एतमेव मन्त्रं मूलीकृत्य प्रवृत्तेऽस्मिन् वाक्ये "असुर्य"पदार्थवर्णनं "न च रमन्ति" (भा.पु. १०.९४.२४) इति क्रियते । तत्र "च"शब्देन महादुःखमनुभवन्तीत्येषोऽर्थः समुच्चीयते । महादुःखसुखाभावपरता अस्य पदस्योक्तव्याख्यान एव सम्भवति, नान्यथा, इति भावः । 'आत्मनो नित्यत्वेन हननासम्भवात् तत्र अनर्थकथनमयुक्तम्', इत्येतदपि अनेन परिहृतम्, "असदुपासनया आत्महन" इति व्याख्यातत्वात् । 'विपरीतं भावयता हि तद्याथात्म्यं तिरस्कृतम्' इति तस्य गौण्या वृत्त्या आत्महन्तृत्वम् । स्पष्टं चात्र प्रमाणमाह — "महादुःख" इति । "विमुखा हरौ" इति समाख्यया अत्र 'आत्मशब्दो हरिपर' इति चोक्तं भवति ।

तथा च — 'नित्यशुद्धबुद्धमुक्तस्वरूपमात्मानं जीवं ये विपरीतं प्रतिपद्यन्ते

[3] "नच रमन्त्यहो" इति प्र. पाठः । यद्यपि भागवततात्पर्यटीकादिसम्मतः पाठोऽयमेवेति भाति । वृत्तसुष्ठुत्वाय च नखल्वित्येव पाठः साधीयान् भवति । सप्तदशाक्षरं हि नर्कुटकम् । — बन्नञ्जे गोविन्दाचार्यः
(भागवततात्पर्यनिर्णये कृत व्याख्यानः पृ. ३७ द्रष्टव्यः)

ते आत्महन' इति अपव्याख्यानमेव । "ते लोका" इति तच्छब्दः प्रसिद्धिद्योतकः । 'ये ते प्रसिद्धा, तान् यान्ति', इत्यर्थः । 'ये आत्महनस्ते केचन तान् लोकान् अभिगच्छन्ति केचन न' इति अन्यथाप्रतीतिनिरासाय आह — "ये के च" इति । 'ये के चात्महनः, ते सर्वेऽपि इत्येवं नियमपरमेवेदं, न तु उक्तप्रकारेण विभागपरम्', इत्यर्थः । कुतः? इत्यत आह — "नियमेन" इति । 'नियमेनेत्यस्यैव विवरणं सर्वेऽपि', इति । अन्धयतीति "अन्धम्" । 'अतिनिबिडान्धकारावृता', इत्यर्थः । "प्रेत्य" मृत्वा । एवं उदाहृतवचनविरोधादेव 'देवादिशरीराणि असुर्या लोका' इति व्याख्यानमयुक्तमेव — इति ॥ ३॥

वा.प्र.॥ श्रुतिगीता हि काञ्चित् श्रुतिं मूलीकृत्य प्रवर्तते । "न च रमन्ति" इति च श्रुतिगीतावाक्यम् । अतः "एवैतमेव मन्त्रं मूलीकृत्य" इत्युक्तम् । "ये के च आत्महनस्ते सर्वेऽपि" इत्यत्र यः कोऽपि ब्राह्मणोऽस्मिन् ग्रामे नास्तीत्युक्ते, नियमेन ब्राह्मणाभावस्य प्रसिद्धत्वादिति भावः । "देवादिशरीराणि" इत्यस्य स्थाने 'अदेवादिशरीराणि' इति न्याय्यम् । तथा च 'अदेवादिशरीराणि' इत्यस्य सुरयोग्या लोकाः देहाः सुर्याः । 'ते न भवन्तीत्यसुर्या, अदेवादिदेहाः भूतप्रेतपिशाचादिशरीराणि', इति यावत् । "आदि"पदेन तामसयोन्यन्तरं गृह्यते । "असूर्य"पदशक्तिलभ्योऽपि अयमेवार्थः । सति चैवं सुराणामप्यसुरत्वमभिप्रेत्य "परमात्मभावं अद्वयमपेक्ष्य देवादयोऽप्यसुरा" (शं. भा. ३) इति परभाष्यं स्वस्वरूपप्रदर्शनपरमेव, इति अवगन्तव्यम् ॥ ३॥

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।**
**तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४॥**

"अनेजन्निर्भयत्वात् तदेकं प्राधान्यतस्तथा ।
सम्यग् ज्ञातुमशक्यत्वादगम्यं तत् सुरैरपि ।
स्वयं तु सर्वानुगमात् (सर्वानगमत्) पूर्वमेव स्वभावतः ।
अचिन्त्यशक्तितश्चैव सर्वगत्वाच्च तत् परम् ।
द्रवतोऽत्येति सन्तिष्ठत् तस्मिन् कर्माण्यधान्मरुत् ।
मारुत्येव यतश्चेष्टा सर्वा तां हरयेऽर्पयेत्" ॥

— इति ब्रह्माण्डे । "ऋष ज्ञाने" ॥ ४॥

ज.टी. ॥ एवं निवृत्तकर्मणा, विशुद्धाशयस्यैहिकामुष्मिकाशेषविषयेभ्यो व्यावृत्तस्य ईश्वरतत्त्वबुभुत्सावतः, 'कोऽसावात्मा, यद्विपरीतोपासनं असुर्यलोकप्राप्तिसाधनं स्याद्?' इत्यपेक्षायां परमात्मतत्त्वोपदेशः क्रियते, "अनेजद्" इत्यादिना । तत्राद्यं मन्त्रमन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे — "अनेजद्" इति । तत्परमात्मस्वरूपं निर्भयत्वादेव "अनेजद्" अकम्पमानम् ।

न तु निष्क्रियत्वात् । प्राधान्यत एव चैकं, न तु द्वितीयवस्तुरहितत्वात् । "तथा"शब्दो विशेषणसमुच्चये । "मनसो"ऽपि "जवीयो" वेगवत्तरम् । मनो हि वेगवत्प्रसिद्धसम्यग्ज्ञातुमशक्यत्वादेव "नैनद्देवा आप्नुवान्" इति तत्सुरैरपि अगम्यमुच्यते, न तु सर्वथा अगोचरत्वात् । "पूर्वमर्षद्" इत्यस्य व्याख्यानं "स्वयं तु सर्वान्" इति । "अगमद्" व्यजानात् । "पूर्वमेव" इत्यनुवादेन "स्वभावत" इति विवरणं अचिन्त्यशक्तितश्च सर्वगतत्वाच्च तत्परं ब्रह्म सन्तिष्ठत् द्रवतोऽन्यान् अत्येति उच्यते । न तु अन्यस्य कल्पितत्वात् । "अप" इत्यस्य व्याख्यानं "कर्माणि" इति । आसमन्तात् पालयन्ति, इति कर्माण्यापः — 'सर्वैः क्रियमाणानि कर्माणि तस्मिन्नर्पितवान्' इत्यर्थः । 'अन्यकर्माणि कथं मातरिश्वा अर्पयेद्?' इत्यत आह — "मारुति" इति । 'यतः सर्वा चेष्टा मरुत्प्रेरणयोत्पन्नत्वात् मारुती, अतः तां हरये हरौ अर्पयेदित्युक्तम्' इत्यर्थः । "अर्षद्" इत्येतत् "अगमद्" इति व्याख्यातम् । तन्मूलभूतं धातुसूत्रमपि पठति, "ऋष ज्ञान" इति[4] । "अनेजद्" इत्यादेः निष्क्रियत्वाद्यर्थकल्पने "मनसो जवीय" इत्यादिविरोधश्च । न च सोपाधिकनिरुपाधिकत्वेन व्यवस्था, मुख्यार्थसम्भवे अमुख्यार्थायोगात् । स्वप्रधाने ब्रह्मणि वेदान्तानां तात्पर्यादत्र स्वरूपकथनमात्रेण वाक्यपरिसमाप्तिः ॥ ४ ॥

वा.प्र.॥ "अगमद्व्यजानाद्" इत्यत्र 'गत्यर्थानां ज्ञानार्थत्वाद्' इति भावः । "अचिन्त्यशक्तित" इति वदता भाष्यकारेण 'अत्रैव स्थितस्य अनन्तरूपग्रहणशक्तिसद्भावाच्च एकेन रूपेण तिष्ठत रूपान्तरेण द्रवतोऽत्येति' इति गत्यन्तरं सूचितम् — "अप इत्यस्य व्याख्यानं कर्माणि इति" । "कर्माणि" इत्यत्र सर्वकर्मणामन्ते कृष्णार्पणबुद्ध्या अपां दीयमानत्वात् शिखाग्रहणेन शिखिनामाकर्षवद् "अप्"पदेन सर्वकर्मणामुपलक्षणाम्, इति भावः । "एतादृशं ब्रह्मोपासीत" इत्यादिज्ञात्रपेक्षितक्रियानभिधानात्, "स्वप्रधाने ब्रह्मणि" इत्युक्तम् । 'सास्नादिमती गौः', 'पृथुबुध्नोदराकारो घटः' इत्यादौ लौकिकवाक्ये,

---

[4] आगमस्य स्वयं प्रमाणत्वाद् "अपि"शब्दः । धातुसूत्रपठने गमेर्ज्ञानार्थत्वं न ज्ञायेत? "सम्यग्ज्ञातुमशक्यत्वाद्" इति पूर्ववाक्यार्थपर्यालोचनया तज्ज्ञानसम्भवेऽपि 'प्रतिपत्तिगौरवप्रसङ्गाद्' इति भाष्यकृतो भावः स्फुटत्वान्न वर्णित, इति बोध्यम् । यद्यपि काशिकायां "ऋषीगतौ" इति धातुं पठित्वा, "ईदित्त्वादेव हि ऋष्ट इत्यादौ श्वीदितो निष्ठायाम्" इति निष्ठाया अनिट्त्वमुक्तम् । धातुपाठेऽपि "ऋषीगतौ" इति ईदित्त्वेन गत्यर्थक एव धातुः पठ्यते, न तु "ऋष ज्ञान" इति । तथापि गत्यर्थस्य ऋषतेर्ज्ञानार्थत्वमुक्तानुबन्धत्वं च अभिप्रेत्य भाष्ये "ऋष ज्ञान" इति धातुः पठित इति द्रष्टव्यम् । यद् वा सर्वज्ञभाष्यकृत्प्रयोगानुसारेण "ऋष ज्ञान" इत्यपि धातुरस्ति, इति ज्ञातव्यम् । — श्रीमद्रघुनाथतीर्थविरचिता ईशावास्यभाष्यटीकाविवृतिः ।

"सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ. २.१.१) इति श्रौतवाक्ये च, स्वरूपमात्रनिरूपणेनापि वाक्यपर्यवसानदर्शनाद्, इति भावः ॥ ४॥

**तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।**
**तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ ५ ॥**

"तदेजति", तत (एव) एजत्यन्यत् ।
तत् स्वयं नेजति ।

"ततो बिभेति सर्वोऽपि न बिभेति हरिः स्वयम् ।
सर्वगत्वात् (दूरगत्वात्) स दूरे च बाह्येऽन्तश्च समीपगः" ॥

— इति तत्त्वसंहितायाम् ॥ ५ ॥

ज.टी. ॥ उत्तरमन्त्रे "तदेजति" इत्यस्य "तद् ब्रह्म चेष्टत" इति तु व्याख्यानं प्रायपाठविरुद्धम् । अतः, "तद्बिभेति" इत्यन्यथाप्रतीतिः स्यात्? तन्निरासाय आह — "तद्" इति । "तद्" इत्यव्ययम् । पञ्चम्यर्थे चेदमङ्गीक्रियते । तर्ह्येजनस्य किं कर्तृ? तत्राऽह — "अन्यद्" इति । 'ननु किमध्याहारेण 'तद् ब्रह्म बिभेति' इत्येवार्थः किं न स्याद्?' इत्यतः "तन्नैजति" इत्युत्तरवाक्यविरोधात् । 'शाब्द्या हि अनुपपत्तेरार्थी बलवति', इति भावेन तद् व्याख्याति — "तत् स्वयम्", इति ।

"तन्नैजति" इत्येतन्निष्क्रियत्वार्थमपि व्याख्यातुं शक्तमित्यतो मन्त्रार्थे समाख्यामाह — "तत" इति । 'दूरे समीपतश्च बाह्येऽन्तश्च' इति योज्यम् ॥ ५ ॥

वा.प्र.॥ "प्रायपाठविरुद्धम्" इत्यस्य "तदेजति", "तन्नेजति" इत्यादि प्रायपाठविरुद्धमित्यर्थः । "शाब्द्या हि अनुपपत्तेः" इत्यत्र 'तद्ब्रह्म एजति चलति' इति यथाश्रुत वाक्यार्थकथने "तन्नेजति" इत्युत्तरवाक्यविरोधः स्यात्? कम्पनरूपैजनस्य निर्भये ब्रह्मण्यसम्भवात् यथास्थितवाक्ययोजनायां अर्थ एवानुपपन्नः । भिन्नवाक्यतायां तु "तस्मादेजति" इति ब्रह्मनिमित्तकैजनरूपार्थस्य अनुपपत्त्यभावात् न अर्थानुपपत्तिः । किन्तु 'किमेजति?' इत्याकाङ्क्षायां "अन्यद्" इति पदाध्याहाराभावे वाक्ययोजनानुपपत्तिरूपा शाब्द्येवानुपपत्तिरिति भावः । "दूरे बाह्येऽन्तः समीपग" इति यथास्थितवाक्ययोजनायाः पौनरुक्त्येनासम्भवात् 'दूरे समीपतश्च, बाह्येऽन्तश्च, इति भिन्नक्रमेण योजना कार्या', इति भावेनोक्तम् — "दूरे समीपतश्च" इति ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६॥

“सर्वगं परमात्मानं सर्वं च परमात्मनि ।
यः पश्येत् स भयाभावान्नाऽऽत्मानं गोप्तुमिच्छति” ॥

— इति सौकरायणश्रुतिः ॥ ६॥

ज.टी. ॥ “तद्दूरे तद्वन्तिक” इत्यादौ परमेश्वरस्य सर्वभूताश्रयतया सर्वभूतगतत्वमुक्तम् । तज्ज्ञानफलं “यस्तु सर्वाणि” इति मन्त्रेणोच्यते । “तत्र जीवस्य सर्वभूतात्मकत्वमुच्यत” इति अपव्याख्याननिरासाय मन्त्रं श्रुत्या व्याचष्टे — “सर्वगम्” इति । “सर्वगं परमात्मानम्” इति “सर्वभूतेषु च आत्मानम्” इत्यस्यार्थः । “सर्वं च परमात्मनि” इति पूर्वार्धस्य । “भयाभावाद्” इति “ततो न विजुगुप्सत” इत्येतद् व्याख्यानस्य “नात्मानं गोप्तुं इच्छति” इत्यस्य उपपादनम् । अभेदार्थतायां सप्तम्यनुपपत्तिश्च ॥ ६॥

वा.प्र.॥ “सर्वभूतानि आत्मनि आत्मत्वेन अभिपश्यति” इति अपव्याख्यानकर्तुरभिप्राय इति भावेनाह — “जीवस्य सर्वभूतात्मकत्वम्” इति । इदं चोपलक्षणम् । ‘सर्वभूतानि आत्मनि स्वस्मिन् जीव’ इति यथाश्रुतार्थकथनाशा अपि एकस्मिन् जीवे सर्वजीवानामभावेन परस्यानुपपन्नैव ।

अस्माकं तु विश्वरूपे भगवति सर्वजीवानामाश्रितत्वात् न काऽप्यनुपपत्तिः —

“ब्रह्माणमीशं कमलासनस्थं
ऋषींश्च सर्वानुरगांश्च दिव्यान् ।
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान्” ॥ (भ.गी. ११.१५)

— इति हि स्मृतिः ॥ ६॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७॥

"यस्मिन्" परमात्मनि सर्वभूतानि स परमात्मैव तत्र सर्वभूतेष्वभूत् । एवं सर्वभूतेष्वेकत्वेन परमात्मानं "विजानतः" "को मोहः" ?

"यस्मिन् सर्वाणि भूतानि स आत्मा सर्वभूतगः ।
एवं सर्वत्र यो विष्णुं पश्येत् तस्य विजानतः ।
को मोहः कोऽथवा शोकः स विष्णुं पर्यगाद्यतः (पर्यगादतः)" ॥

— इति पिप्पलादशाखायाम् ।

पूर्वोक्तानुवादेन शोकमोहाभावो विजानतश्चात्रोच्यते । अभ्यासश्च सर्वगतत्वस्य तात्पर्यद्योतनार्थः ॥ ७॥

ज.टी. ॥ एतन्मन्त्रार्थविवरणार्थो, "यस्मिन् सर्वाणि" इत्ययं मन्त्र इति वक्ष्यति । तत्र "यस्मिन्" "आत्मनि" जीवे "सर्वभूतानि" स "आत्मैव" यस्य "विजानतः" तानि "संवृत्त" (शं.भा. ७) इत्याद्यन्यथाप्रतीति निरासाय मन्त्रं व्याख्याति — "यस्मिन्" इति । 'सर्वभूतानि तिष्ठति' इति शेषः । "तत्र" इत्यनुवादेन "सर्वभूतेषु" इति व्याख्यानम् । "अभूद्" अनादितो वर्तते । "विजानत" इत्यस्य अन्वयसिद्ध्यर्थं, "एवम्" इति अध्याहारः कृतः । 'एवं सर्वाधारतया सर्वभूतेषु परमात्मानं विजानतः, तं च एकत्वेन विजानत', इति योज्यम् । "विजानतो", "अनुपश्यत" इति द्वयोरपि व्याख्यानं — "विजानत" इति ।

'अर्थान्तरे सम्भवति, कुतोऽयं मन्त्रार्थः?' इत्यतः 'श्रुत्यन्तरेण व्याख्यानाद्' इति भावेनाह — "यस्मिन्" इति । 'विजानत एकत्वं च', इति शेषः ।

'ननु परमेश्वरज्ञानेऽपि कुतः शोकाद्यभावः?' इत्यत आह, "स विष्णुम्" इति । 'यतो ज्ञानी विष्णुं पर्यगात् सम्यक् प्राप्नोत्येव, अतः शोकाद्यभावः तस्य युक्तः', इत्यर्थः ।

अनेन "स पर्यगाद्" इत्युत्तरमन्त्रार्थतात्पर्यमप्युक्तं भवति । "एकत्वम्" इत्यस्य पौनरुक्त्यं च, अन्यथा । अनुवादस्य वैयर्थ्यात् ।

'नन्वेवं मन्त्रव्याख्यानेऽपि पुनरुक्तिः स्यात्, "यस्तु सर्वाणि भूतानि" (ई.उ. ६), "आत्मन्येव" (ई.उ. ६) इत्यस्य "यस्मिन् सर्वाणि भूतानि" इत्यनेन उक्तत्वात्, "सर्वभूतेषु चात्मानम्" (ई.उ. ६) इत्यस्य च "आत्मैवाभूद्" इत्यनेनोक्तत्वात्? अतो नायं मन्त्रार्थः', इत्यत आह — "पूर्व" इति । 'पूर्वमन्त्रोक्तस्य सर्वाधारतया, सर्वगतत्वस्य अत्र अनुवादोऽतो न पुनरुक्तिः', इत्यर्थः । 'न च वाच्यमधिकविधानाय अनुवादो भवति । न च अत्र अधिकं किञ्चिद्' इति । 'पूर्वमेवंविदो भयाभावः फलत्वेनोक्तः । अत्र पुनः शोकमोहाभावोऽपि । प्राक् सर्वाधारत्वेन सर्वगतत्वदर्शनफलमुक्तम् । अत्र तु 'विशेषतो जानत इत्येवं फले ज्ञाने च आधिक्यसद्भावाद्' — इत्यर्थः । उपलक्षणं चैतत् ।

"एकत्वमनुपश्यत" इत्याधिक्यं च द्रष्टव्यम् । "तद्धावत" (ई.उ. ४) इत्यस्य सर्वगतत्वस्य "तद्दूर" (ई.उ. ५) इत्यादिना पुनरुच्यमानत्वात्, पुनरुक्तिदोषः, इत्याशङ्कां पुनरुक्तिदोषपरिहारप्रसङ्गात् परिहरति, "अभ्यासश्च" इति । 'श्रुतिः स्वस्य परमात्मसर्वगतत्वे तात्पर्यं द्योतयितुं तदभ्यस्यति, इति न दोषः', इत्यर्थः । सर्वगतत्वस्य इत्युपलक्षणम् । "अनेजत्" (ई.उ. ४), "तन्नैजति" (ई.उ. ५) इत्यभयत्वस्यापि द्रष्टव्यम् ॥ ७॥

वा.प्र.॥ 'ब्रह्मगमनस्य निश्चितत्वाद् अगादित्यतीतत्वोक्तिः' इति भावेनाह — "सम्यग् प्राप्नोति" इति । "एष्यत् च (तु) निश्चितं यत् तद् (स्याद्) अतीतत्वेन भण्यते" इति स्मृतिः[5] । "आत्मैवाभूद्" इति पूर्वार्धेऽपि परेणैक्यस्य कथितत्वात् पुनरुत्तरार्धे "एकत्वमनुपश्यत" इत्येकत्वस्यैव कथनात् पौनरुक्त्यम् । न च भाष्ये वक्ष्यमाणरीत्या परेणापीदं पौनरुक्त्यमभ्यासार्थमिति परिहर्तुं शक्यम् । सर्वभूतानामन्ते ब्रह्मण्येकीभावं वदताऽपि परेणैकस्मिन् जीवे सर्वभूतैक्यं नाङ्गीक्रियते । उभयोरपि भिन्नदेहाद्यवच्छिन्नत्वेन बाधितं च । एवं च बाधितेऽर्थे 'रज्जुः सर्प' इति बहुवारमभ्यासेऽपि यथा नार्थसिद्धिः, तात्पर्यं तु दूरापास्तं, तथा अत्रापि उक्तरीत्या बाधिते परस्यानभिमतेऽर्थे अभ्यासोऽऽपि स्वस्य शास्त्राभ्यासराहित्यसूचक एव । न तु परस्यार्थसाधकः । टीकाकृतोक्तपौनरुक्त्यं तु अभ्युपगमवादेन, इति ज्ञेयम् । अस्माकं तु 'यस्मिन् सर्वाणि भूतानि स आत्मैव सर्वभूतेषु अभूत्' इत्यर्थाश्रयणात् स्थानभेदेन परमात्मनि प्राप्तभेदनिवारणाय "एकत्वमनुपश्यत" इति सार्थकम् — इति भावः ॥ ७॥

---

[5] "एष्यच्च निश्चितं यत् तदतीतत्वेन भण्यते ।
चक्रवत् परिवृत्तेर्वा दुष्टानां मोहनाय च" ॥ इति नारदीये
— इति भागवततात्पर्यनिर्णये (३.४.२५)

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ
शुद्धमपापविद्धम् । कविर्मनीषी परिभूः
स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः
समाभ्यः ॥ ८ ॥

"शुक्रं तच्छोकराहित्यादव्रणं (अव्रणं) नित्यपूर्णतः ।
पावनत्वात् सदा शुद्धं अकायं (शुद्धमकायं)[6] लिङ्गवर्जनात् ।
स्थूलदेहस्य राहित्यादस्नाविरमुदाहृतम् ।
एवम्भूतोऽपि सार्वज्ञ्यात् कविरित्येव शब्द्यते ।
ब्रह्मादिसर्वमनसां प्रकृत्या मनसोऽपि च ।
ईशितृत्वान्मनीषी स परिभूः सर्वतो वरः ।
सदाऽनन्याश्रयत्वाच्च स्वयम्भूः परिकीर्तितः ।
स सत्यं जगदेतादृङ्नित्यमेव प्रवाहतः ।
अनाद्यनन्तकालेषु प्रवाहैकप्रकारकम् (प्रवाहैकप्रकारतः) ।
नियमेनैव ससृजे भगवान् पुरुषोत्तमः ।
सज्ज्ञानानन्दशीर्षोऽसौ सज्ज्ञानानन्दबाहुकः ।
सज्ज्ञानानन्ददेहश्च सज्ज्ञानानन्दपादवान् ।
एवम्भूतो महाविष्णुर्यथार्थं जगदीदृशम् ।
अनाद्यनन्तकालीनं ससर्जाऽत्मेच्छया प्रभुः" ॥

— इति वाराहे ॥ ८ ॥

ज.टी. ॥ ज्ञानिनः शोकाद्यभावे युक्तित्वेन "स पर्यगाद्" इति विष्णुप्राप्तिरुक्ता । तत्र च 'राजादीनिव परमेश्वरं प्राप्तस्यापि शोकाद्यभावः किं निमित्त?' इत्यतः "शुक्रनिमित्त" इत्यादिविशेषणानि । तत्रादेहोक्त्या प्राप्तशङ्कापरिहाराय "कविः" इत्युत्तरार्धः । 'तमिमं मन्त्रमपि' इत्यादिपरिहाराय पुराणवाक्येन व्याख्याति — "शुक्रम्" इति । 'शुचं शोकं रहति त्यजति, इति शुक्रम्' इत्यर्थः । "नित्यपूर्णत" इति 'नित्यत्वपूर्णत्वाभ्याम्' इत्यर्थः । "व्रण सञ्चूर्णन" इत्यतः स्तोको व्रणः कालेनास्तोकं नित्यं गुणैरस्तोकं पूर्णम्, इति । पावनत्वात्, पावित्र्यहेतुत्वात् । यद्यपि कायशब्दः स्थूलसूक्ष्मशरीरसाधारणः, तथापि "अस्नाविरम्" इति स्थूलशरीराभावस्य पृथगुक्तेः, "अकायं लिङ्गवर्जनाद्" इत्युक्तम् । स्नावोपलक्षितधातुमयं स्नाविरं स्थूलशरीरमेव

[6] 'शुद्धमकायम्' इति प्र.पाठः । प्राचीनपाठे तु "एवम्भूतोऽपि सार्वज्ञात् कविः" इति वक्ष्यमाणविशेषैकान्वयद्योतनायात्र पुंलिङ्गप्रयोग, इति व्याख्येयम्
— बन्नञ्जे गोविन्दाचार्यः

हि प्रसिद्धम् । यतो हि ब्रह्म "शुद्धम्", तस्माद् "अपापविद्धम्" । ततश्च पापमूलस्थूलसूक्ष्मशरीरविधुरम् । तथा च देहनिमित्तशोकादिशून्यम् । एवम्भूतं च ज्ञानी "पर्यगाद्", सारूप्यादिलक्षणां तद्गतिं गतो भवति । अतः तस्य शोकाद्यभावो युक्तः — इति भावः ।

'यदि अशरीरो विष्णुः, न तर्हि तस्य जगत्सर्जनादि उपपद्यते । घटादि सृष्ट्यादौ शरीरान्वयव्यतिरेकानुविधानदर्शनात् । न च वाच्यम् शुक्तिकायामिव रजतं परमात्मनि जगदारोपितमेव, अतो न शरीरापेक्षा, इति । बाधाभावेन तत्सत्यत्वनिश्चयात् । न च अदेहत्वस्य जगत्सृष्ट्यादेश्च कालभेदेन व्यवस्था । जगत्सृष्ट्यादिप्रवाहस्य अनाद्यनन्ततया प्रमितत्वात् । अतः, सत्यानाद्यनन्तकालीनजगदुत्पत्त्यादिकारणस्य विष्णोः कथमशरीरत्वम्?' इत्याशङ्कापरिहाराय उक्तस्य "कविर्" इत्यादेः व्याख्यानम् — "एवं भूतोऽपि" इति । 'एवम्भूतोऽशरीरोऽपि स पुरुषोत्तमः सत्यं प्रवाहतो नित्यमपि जगत्ससृजः', इति सम्बन्धः । "एतादृग्" इति 'सत्यत्वादिना प्रमितम्' इत्यर्थः । "ससृज" इत्युपलक्षणम् । 'प्रवाहतो नित्यत्वेऽपि पूर्वोत्तराणां जगतां वैचित्र्यं सम्भवति, तन् नास्ति', इति स्वरूपकथनम् "अनादि" इति । 'नियमेन प्रवाहैकप्रकारतः' इति प्रवाहिणामेकप्रकारत्वं अभिप्रैति । तदनेन "शाश्वतीभ्यः समाभ्यः" इति सप्तम्यर्थे व्याख्यातं भवति । 'अनाद्यनन्तसंवत्सरेषु याथार्थ्येन, वर्तमानान् अपि', इत्यर्थः । अशरीरस्य जगत्सृष्ट्यादिनिर्वाहार्थमाह, "सार्वज्ञाद्" इति । "एवाह्येवैवाहि" इतिवत्, "कविरित्येव" कविरित्येवं परिभवति । 'सर्वं वशीकरोति' इति "परिभूः", सर्वतो वरः । 'स्वयमेव परमनपेक्ष्य भवति' इति "स्वयम्भूः", सदा अनन्याश्रयः । "च"शब्दौ विशेषणसमुच्चयार्थौ ।

'ननु शरीराधीनत्वात् सर्जनादेः, कथं सार्वज्ञादिता घटते?' इत्यत आह — "सज्ज्ञान" इति । 'जडशरीराभावेऽपि सज्ज्ञानाद्यात्मकशीर्षादिमान् भवति । यत एवम्भूतस्तस्माज्जगत्ससर्ज' इति योजना । सज्ज्ञानाद्यात्मकविग्रहवत्वमन्येषामविद्यमानं तस्योपपादयितुं सार्वज्ञादिमाहात्म्यमुक्तम् — इति भावः ।

अपरे तु "योऽयमतीतैः मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षणक?" (शं.भा. ८) इत्यपेक्षायामयं मन्त्रमित्युक्त्वा, "स पर्यगाद्" इत्येतदपि आत्मविषयं व्याकुर्वते, 'स आत्मा पर्यगात् व्याप्तोऽभूद्' इति । तत् तु असत्, "शुक्रम्" इत्यादेः द्वितीयान्तस्य अन्वयाभावप्रसङ्गात् । न चैतत् प्रथमान्तम "आत्मान" एव विशेषणं — लिङ्गव्यत्ययात् विपरिणामस्तु, 'अगतिका गतिः' । 'स्वयमेव सर्वं भवति, इति

स्वयम्भूः' इति च "मनीषी परिभूः" इत्यनेन विरुद्धम् ।
न च एवंविधमात्मनो निष्कृष्टं रूपं तेषाम् — इति ॥८॥

वा.प्र.॥ "स्तोको व्रण" इत्यत्र स्तोकोऽल्पता । "किञ्चिन्मात्रं तनुस्तोकह्र स्वाल्पत्रुटयस्समाः" इति हलः । "न च अकायम्" इत्यत्र सर्वथा कायाभावः शङ्क्यः । "यत्ते रूपं कल्याणतमम्" इत्युपरि कल्याणरूपस्य वक्ष्यमाणत्वात् । "अकायमव्रणम्" इत्यत्रापि प्राकृतदुर्भगदेहस्यैव निषेधः । अत एव व्रणादियोग्यदेहाभावसूचनाय "अव्रणमस्नाविरम्" इत्युक्तम् । तस्य हरेः शोकरहितत्वेन तं प्राप्तस्य मुक्तस्यापि शोकराहित्यघटनाय "सारूप्यादिलक्षणां तद्गतिम्" इत्युक्तम् । "नियमेन प्रवाहैकप्रकारत" इतीत्यत्र प्रवाहस्यैकत्वात् तत्रैकप्रकारोक्तिः व्यर्था स्यात्? अत एव "प्रवाहिणाम्" इत्युक्तम् । "कविरित्येव शब्द्यत" इत्युक्ते 'नामान्तरं नास्ति' इति भ्रमः स्यात्? अत "एव"शब्दार्थं सदृष्टान्तमाह — "एवाह्येवैव" इति । "एवाह्येवैवाह्यग्ना" इत्युपनिषद्वाक्येषु "एवाहि", "इति"शब्दस्य 'एवं हि' इत्यर्थ उक्त, इति भावः ।

'ननु "कवि"पदेन भगवतः सार्वज्ञकथनेऽपि तार्किकसर्वज्ञेश्वरवत् देहाभावे कथं सृष्टिः? कुम्भकरण कौशलज्ञानवतोऽपि कुम्भाकारस्य हस्तच्छेदे कुम्भकर्तृत्व अदर्शनाद्' — इति । हरेरपि अलौकिकदेहसद्भावं प्रमाणेन दृढयति — "सज्ज्ञानानन्दशीर्ष" इति । "न चैवं विधम्" इत्यत्र तेषां स्वयमेव सर्वं स्वयं भवति, इति वादिनामेवंविधं "शुक्रमकायमव्रणमस्नाविरम्" इत्यादिनोक्तं निष्कृष्टरूपं अस्ति । मनुष्यपशुपक्ष्यादिरूपेषु शोकसहितत्वात् सकायत्वात् सव्रणत्वात् स्नाविरविशिष्टत्वात् पापविद्धत्वाच्च । तथा च "स्वयम्भु"पदेन सर्वजीवात्मकत्वं वदतां कथं न पूर्वोत्तरविरोध? — इति भावः ॥८॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाँ रताः ॥ ९ ॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

"अन्यथोपासका ये तु तमोऽन्धं यान्त्यसंशयम् ।
ततोऽधिकमिव व्यक्तं यान्ति तेषामनिन्दकाः ।
तस्माद् यथास्वरूपं तु नारायणमनामयम् ।
अयथार्थस्य निन्दां च ... ॥ ९ ॥ १० ॥

ज.टी. ॥ "अन्धन्तमः प्रविशन्ति" इत्यादिमन्त्रान् अप्रतीत्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे — "अन्यथोपासका" इति । 'यथावत् परमात्मज्ञानं मोक्षसाधनम्' इत्युक्तम् । न केवलं तत् । किं नाम? अन्यथाज्ञाननिन्दासमुचितमेवेत्येतदर्थप्रतिपादकं आद्यमन्त्रत्रयम् । तत्र तावत् यथावज्ज्ञानस्येव अन्यथाज्ञाननिन्दायाऽपि आवश्यकत्वोपपादनाय अन्यथाज्ञानस्य उक्तमसुर्यलोकसाधनत्वमनूद्य अन्यथाज्ञान अनिन्दनस्य ततोऽधिकानर्थसाधनत्वमाद्येन मन्त्रेणोच्यते । तस्यार्थो "अन्यथा" इति । 'उपासका विष्णोः' इति शेषः । सर्वत्र ज्ञानशब्दस्य उपासनापर्यन्तत्वात् व्यामिश्रोक्तिः । तत्र "अविद्या"पदं विषयिवाचकं विषयस्य अन्यथाकारस्य लक्षकम्, इत्यभिप्रेत्य 'अविद्यामुपासत इत्येतद् अन्यथोपासका' इति व्याख्यातम् । ततो अन्यथाज्ञानिप्राप्यात्तमसोऽधिकमिव । "इव"अर्थमाह, "व्यक्तम्" इति । "उ"शब्दोऽवधारणार्थः । "विद्यायाम्" इत्यनेन सम्बद्ध्यते । तेन विद्यायां यथार्थज्ञान एव रताः । न तु अन्यथाज्ञाननिन्दां कुर्वन्ति, इत्येषोऽर्थो लभ्यते । अत उक्तं — "तेषामनिन्दका" इति । 'ततः किम्?' इत्यतो वक्ति, "तस्माद्" इति । यस्माद् मिथ्याज्ञान तदनिन्दाभ्यां तमप्राप्तिः । 'निन्दां च विद्याद्' इति शेषः । "अयथार्थस्य निन्दाम्" इति अयथार्थज्ञानस्य निन्द्यत्वम् — इत्यर्थः ॥ ९ ॥

वा.प्र.॥ तमसि अनुभूयमानदुःखातिशयस्य ततोऽधिकमित्यनेनैव प्राप्तेः पुनः "इव"शब्दो व्यर्थ इव भाति, अतस्तदर्थमाह भाष्यकारः — "व्यक्तम्" इति । तमः प्रवेशयन्ति वायुदूताः । अविद्योपासकस्तु सद्विद्यामजानन्नत एव दुर्विद्यानिन्दनमपि अजानन् भगवतो जीवस्वरूपत्वमुक्त्वा दुःखभोक्तृत्वं अज्ञातृत्वं मूलस्वरूपेऽपि निर्गुणत्वादिकमुपास्ते । त्वं तु सद्विद्यां जानन्नत एव दुर्विद्यानिन्दनमपि जानन् दुष्प्रमेयं न निन्दसि, केवलविद्यामेवोपास्से । एवं च भगवद्द्वेष्युपेक्षकत्वाज्ज्ञात्वा कृतब्रह्महत्यावत्तव भगवदपराधोऽधिक इति दोषाधिक्यं घोषयित्वा

तमोमार्गे तं जत्रुताडन-तर्जन-ताडन-जिह्वाच्छेदन-देहदाहादिना बहुतरदुःखादिकं दत्त्व नयन्ति । तं तु न तथा नयन्ति । तमसि ततोऽधिकदुःखानुभवस्य "भूयः"पदेनैव प्राप्त, इति भावः ॥ ९ ॥

ज.टी. ॥ किं विपक्षे अनर्थप्राप्तेरेव सम्यग्ज्ञानासम्यग्ज्ञाननिन्दनयोः कर्तव्यता? नेति ब्रूमः — 'किन्तु मोक्षफलस्यांशत उभयसाध्यत्वादपि' इति प्रतिपादको "अन्यदेवाहुर्विद्यया" इति द्वितीयमन्त्रः । तथा हि — "विद्यया" यथार्थज्ञानेन "अन्यदेव" मोक्षैकलक्षणं फलं प्राप्यमाहुः वृद्धाः । "अविद्यया", 'अन्यथाज्ञाननिन्दया च', इति यावत् । अन्यदेव फलमाहुरिति "धीराणां" धीमतां वृद्धवचनसम्मतियुक्तं वचनं "शुश्रुम" । 'ये धीराः नोऽस्मभ्यं मोक्षसाधनं विचचक्षिरे व्याचचक्षिरे, तस्माद् उपपन्नः समुच्चयः' — इति ॥ १० ॥

वा.प्र.॥ "अविद्यया अन्यथाज्ञाननिन्दया" इत्यत्र अविद्यया मोक्षैकदेशप्राप्तेरसम्भवात् अविद्यानिन्दनस्य प्राक्प्रस्तुतत्वाच्च यथाश्रुतविद्याविद्ययोः भिन्नफलत्वस्य सर्वसम्मतत्वेनावक्तव्यक्तत्वाच्च "अविद्यया मृत्युं तीर्त्वा" इति मोक्षैकदेशरूपफलस्य वक्ष्यमाणत्वाच्च "निन्दया" इति पदमध्याहृत्य व्याख्येयम्, इति भावः । लौकिकधैर्यस्य अप्रयोजकत्वात्, "धियां रता इति धीरा" इति भावेनोक्तम् — "धीमताम्" इति । तेऽपि धीराः कल्पनाशक्त्या नोक्तवन्त इति भावेनोक्तम् "वृद्धवचनसम्मतियुक्तम्" इति ॥ १० ॥

## विद्यां चाविद्यां च यस्तद्वेदोभयँ सह ।
## अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

> "... ये विदुः स ह (ते हि) सज्जनाः ।
> ते निन्दयाऽयथार्थस्य दुःखाज्ञानादिरूपिणः ।
> दुःखाज्ञानादिसन्तीर्णाः सुखज्ञानादिरूपिणः ।
> यथार्थस्य परिज्ञानात् सुखज्ञानादिरूपताम् ।
> यान्ति ... ॥ ११ ॥

ज.टी. ॥ अस्यैवार्थस्य विवरणार्थो "विद्यां च" इति तृतीयो मन्त्रः । तस्येदं व्याख्यानं — "ये विदुः" इति । "यथास्वरूपं तु" इत्याद्युक्तावृत्त्याऽन्वयः । तेन '"विद्या"पदं ईश्वरयाथात्म्यस्य, "अविद्या"पदं च अन्यथाज्ञाननिन्द्यत्वस्य, उपलक्षणम्' इत्युक्तं भवति । "स ह" इत्येकपुरुषार्थहेतुत्वेन, इत्यर्थः । 'दुःखाज्ञानादिरूपिणो अयथार्थस्य', इति, तज्ज्ञानस्येत्यर्थः । 'अयथार्थज्ञाननिन्दया

मृत्युपदोदितदुःखादितरणं भवति, यथार्थज्ञानेन च सुखज्ञानादिरूपतालक्षणामृतप्राप्तिः भवति', इत्येतदुपपादनाय 'दुःखाज्ञानादिरूपिणोऽयथार्थस्य सुखज्ञानादिरूपिणो यथार्थस्य' इति विशेषणोपादानं कृतम् । तथा च श्रुतिः — "तं यथा यथोपासते तदेव भवति" (शतपथ ब्रा. १०.५.२.२०) इति ॥ ११॥

वा.प्र.॥ क्रमिकज्ञानयोः युगपदुत्पत्त्यभावात् सहशब्दार्थमाह — "एकपुरुषार्थता" इति ॥ ११॥

**अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।**
**ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२॥**

**अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।**
**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३॥**

"... एव (एवं) सृष्टिकर्तृत्वं नाङ्गीकुर्वन्ति ये हरेः ।
तेऽपि यान्ति तमो घोरं तथा संहारकर्तृताम् ।
नाङ्गीकुर्वन्ति तेऽप्येवं तस्मात् सर्वगुणात्मकम् ।
सर्वकर्तारमीशेशं सर्वसंहारकारकम् (सर्वसंहारकारणम्) । ॥ १२॥ १३॥

ज.टी. ॥ 'अन्यथाज्ञानमेव अनर्थसाधनं, यथार्थज्ञानमेव मोक्षसाधनम्', इत्येतद्विवरणार्थम्, "अन्धं तमः प्रविशन्ति" इत्युत्तरमन्त्रत्रयम् । तत्राद्यमन्त्रस्यार्थः — "एवम्" इति । 'यथाऽन्यथोपासका, अन्यथाज्ञानानिन्दका इत्यर्थः' । "असम्भूतिं" जगत्सृष्टेरकर्तारं, इत्यस्य तात्पर्यं "सृष्टि" इति । अत्रापि "उ"शब्दो अवधारणार्थः । "सम्भूत्याम्" इत्यनेन सम्बध्यते तेन सम्भूत्यां "उ" जगत्स्रष्टृत्व एव । 'जगत्स्रष्टैव विष्णुः, न तु संहारकर्ता' इत्यस्मिन्नर्थे रता इत्येषोऽर्थो लभ्यते । तस्मादुक्तम् — "तथा" इति । 'तेऽप्येवं सृष्टिकर्तृत्वानङ्गीकारिण इव तमो यान्ति' इत्यर्थः । 'ततः किं?' इत्यत आह — "तस्माद्" इति । 'यस्मादेवं सृष्टिकर्तृत्वानङ्गीकारे अनर्थः विद्याद्' इति वाक्यशेषः । 'सृष्टिकर्तृत्वानङ्गीकारे अनर्थकथनमुपलक्षणार्थम्', इति ज्ञापयितुं "सर्वगुणात्मकम्" इत्युक्तम् । एतदप्युपलक्षणम्, उपसंहारे अधिकस्यापि वक्ष्यमाणत्वात् ॥ १२॥

'किं विपक्षे बाधकसद्भावादेवैतज्ज्ञातव्यम्?' नेति ब्रूमः — 'किन्तु मोक्षोपयोगित्वादपि', इति प्रतिपादयितुं "अन्यदेवाहुः सम्भवाद्" इति द्वितीयो मन्त्रः । तत्र 'सम्भवात् सृष्टिकर्तृत्वज्ञानात्, असम्भवात्

सम्भवविपरीतसंहारकर्तृत्वज्ञानाद्', इत्यर्थः ॥१३॥

वा.प्र.॥ 'न विद्यते सम्भूतिर्यस्माद्' इति व्युत्पत्तिमभिप्रेत्याह — "जगत्सृष्टेरकर्तारम्" इति । "उपसंहारेऽधिकस्यापि वक्ष्यमाणत्वाद्" इत्यत्र "सर्वदोषविनिर्मुक्तम्" इत्यादिश्लोकत्रयेण बहुप्रमेयाणां निरूप्यमाणत्वाद् आधिक्यमिति भावः ॥१२॥१३॥

**सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह ।**
**विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥१४॥१॥**

"यो वेद संहृतिज्ञानाद् देहबन्धाद् विमुच्यते ।
सुखज्ञानादिकर्तृत्वज्ञानं तद्व्यक्तिमाव्रजेत् ।
सर्वदोषविनिर्मुक्तं गुणरूपं जनार्दनम् ।
जानीयान्न गुणानां च भागहानिं प्रकल्पयेत् ।
न मुक्तानामपि हरेः साम्यं विष्णोरभिन्नताम् ।
नैव प्रचिन्तयेत् तस्माद् ब्रह्मादेः साम्यमेव वा ।
मानुषादिविरिञ्चान्तं तारतम्यं विमुक्तिगम् ।
ततो विष्णोः परोत्कर्षं सम्यग् ज्ञात्वा विमुच्यते" ॥

— इति कौर्मे ॥१४॥१॥

ज.टी. ॥ तस्यैव विवरणार्थः "सम्भूतिं च" इति तृतीयो मन्त्रः । तस्यार्थो "यो वेद" इति । पूर्ववदावृत्त्यैव अन्वयः — "संहृतिज्ञानाद्" इति । 'तत्कृतत्वज्ञानाद्' इत्यर्थः । देहसम्बद्धस्य मृत्युत्वं तद्धेतुत्वाद् ज्ञातव्यम् । "सुखज्ञानाद्" इति पूर्ववद् युक्तिसूचनार्थम् । मन्त्रार्थमुपसंहरति, "सर्व" इति । "तस्माद्" इति वक्ष्यमाणमादौ योज्यम् । 'हरेः साम्यं न चिन्तयेद्' इति वक्ष्यमाणेन अन्वयः । 'विष्णोरभिन्नतां मुक्तानाम्' इत्यनुवर्तते । ब्रह्मादेः अमुक्तवर्गस्य साम्यमेव किमुत अभिन्नताम्? "वा" शब्दो "न चिन्तयेद्" इत्यस्य अनुकर्षणार्थः । "मानुषादि" इत्यत्र "जानीयाद्" इत्यनुवर्तते । ततो मुक्तामुक्तगणात्तस्माद् इति परामृष्टं हेतुं दर्शयति — "सम्यग्" इति ।

केचिद् "अविद्या"पदं कर्मवाचकं मत्वा, 'एकैकनिन्दया मोक्ष ज्ञानकर्मणोः समुच्चयस्य प्रतिपादकमाद्यमन्त्रत्रयम्' इति मन्यन्ते । अन्ये तु "विद्या"पदं देवताज्ञानस्य वाचकं मत्वा, 'स्वर्गादौ तस्य कर्मणा समुच्चयं प्रतिपादयतीदम्' इत्याचक्षते । उत्तरं तु मन्त्रत्रयं, "सम्भूति", "असम्भूति" पदयोः उत्पत्त्यनुत्पत्तिमत्परत्वेन (उत्पत्त्यनुपपत्तिमत्परत्वेन) हिरण्यगर्भप्रकृतिवाचकत्वं गृहीत्वा, तदुपासनयोः सत्यलोकादिप्राप्तौ समुच्चयस्य प्रतिपादकम्, इति प्रतिपन्नाः ।

तदेतदपव्याख्यानम्, पुराणवाक्येनैव अन्यथा व्याख्याततत्वात् ।

"नान्यः पन्था" (श्वे.उ. ३.८, तै.आ. ३.१२.१७) इत्यादिश्रुतिविरुद्धश्च समुच्चयपक्षः । 'केवलकर्मिणोऽपि अधिकः केवलज्ञानिनः संसार' इति च "कामकारेण चैके" (ब्र.सू. ३.४.१५) इत्यादिविरुद्धम् । आत्मज्ञाननिष्ठाया एव अत्र उपक्रमादिभिः निर्णीतत्वाद्, देवताज्ञानकर्मणोः समुच्चयश्च न प्रकरणानुगुणः । "कुर्वन्नेव" (ई.उ. २) इति मन्त्रस्यापि निवृत्तकर्मविषयतया व्याख्याततत्वात् । "सम्भूतिं च विनाशं च" इत्यत्र, 'कुतोऽयं विनाश आपातितः?' इति चिन्त्यम् । 'विनाशधर्मकत्वाद्, विनाशो हिरण्यगर्भ' (शं.भा. १४) इति चेन्न — "सम्भूति"पदेन पौनरुक्त्यात् । अव्याकृतोक्त्यभावाच्च । 'अकारलोपेन सम्भूतिरव्याकृतम्, इत्यपूर्वं व्याकरणकौशलम्' इत्यास्ताम् ॥ १४ ॥

वा.प्र.॥ "आदौ योज्यम्" इत्यत्र तस्माद्विष्णोः इत्यर्थकथनाय तत्रापि तस्मादित्यस्यावश्यकत्वात् उपसंहारत्वज्ञापकपदस्यात्रादर्शनात् आदावपि योज्यम्, इति भावः । "अव्याकृतोक्त्यभावात्" इत्यत्र प्राग् "असम्भूति"पदेन, 'न विद्यते सम्भूतिः यस्या' इति "असम्भूति"पदेन प्रकृतिमुक्त्वा इदानीं तत्स्थाने प्रयुक्त "विनाश"पदेन हिरण्यगर्भोक्तौ प्रकृतिवाचकपदाभावाद्, इति भावः । "अकारलोपेन" इत्यत्र "सम्भूति"पदे अकारप्रक्षेपं कृत्वा प्रकृतिमभिधाय, पुनः तल्लोपे सति "सम्भूति"पदमात्रमुर्वरितम्, इति व्याख्यानस्य प्रसिद्धव्याकरणे अनुशासनाभावाद् "अपूर्वं व्याकरणकौशलम्" इत्युक्तम् ।

यद्यपि निरुक्तिमात्रे वर्णनाशादिकमुक्तं, तथाऽपि स्वापेक्षितलौकिकप्रयोगेषु वर्णनाशादेः कथने 'घट'पदमघटवाचकं 'पट'पदं अपटवाचकं 'ऐक्य'पदं चानैक्यवाचकं स्याद्, इति सर्वव्यवहारेषु सङ्करप्रसङ्गः — इति भावः ॥ १४ ॥

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**
**तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥**

"पात्रं हिरण्मयं सूर्यमण्डलं समुदाहृतम् ।
विष्णोः सत्यस्य तेनैव सर्वदाऽपिहितं मुखम् ।
तत्तु पूर्णत्वतः पूषा विष्णुर्दर्शयति स्वयम् ।
सत्यधर्माय भक्ताय ... ॥ १५ ॥

ज.टी. ॥ एवं प्राप्ताधिकारं शिष्यं प्रति परमात्मस्वरूपं निरूप्य 'तत्साक्षात्कारो

मोक्षसाधनम्' इति अतीतग्रन्थेनोक्तम्[7] । स च ईश्वरसाक्षात्कारो न श्रवणादिमात्रेण भवति । नापि मोक्षः साक्षात्कारमात्रेण । किन्तु भगवत् प्रसादादेवेत्यतोऽनुष्ठित श्रवणादिकेनापि साक्षात्कारार्थं प्राप्तसाक्षात्कारेणापि च मोक्षार्थं, यथा भगवत्प्रार्थनं कार्यं । तत्प्रकारप्रदर्शनार्थो "हिरण्मयेन पात्रेण" इत्याद्युत्तरो ग्रन्थः ।

'तत्र सगुणब्रह्मप्राप्त्यर्थमेकर्षिप्रभृतिशब्दाभिधेयमादित्यं प्रति मार्गयाचनमनेन क्रियत" इत्याद्यन्यथाप्रतीतिनिरासाय तद् व्याख्यानरूपां स्मृतिं तावदुदाहरति — "पात्रम्" इति । "सत्यस्य" इत्यनूद्य "विष्णोः" इति व्याख्यातम् । "मुखम्" इति समस्तविग्रहोपलक्षणम् । यद्यपि मन्त्रे "अपावृणु" इति प्रार्थनम् । अत्र तु "दर्शयति" इति स्वरूपकथनम् । तथापि 'मन्त्रतात्पर्यमात्रोक्तिरियम्' इति न दोषः । "पुष पुष्टौ" (७४८.१२५९, १६३१) इत्यतः पूर्णत्वेन "पूषा" इत्युक्तम् । "सत्यधर्माय" इत्यनूद्य "भक्ताय" इति व्याख्यानम् ॥ १५ ॥

वा.प्र.॥ "दर्शयति इति स्वरूपकथनम्" इत्यत्र प्रार्थनार्थकलोटोऽभावात् स्वरूपसङ्कीर्तनमात्रमित्युक्तम् । इदमप्युपलक्षणम् । "अपावृणु" इति पदस्य फलितकथनं चेत्यपि द्रष्टव्यम् ॥ १५ ॥

**पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् ।**
**समूह तेजः यत् ते रूपं कल्याणतमं तत् ते पश्यामि ॥ १६ ॥**

"... प्रधानज्ञानरूपतः ।
विष्णुरेकऋषिर्ज्ञेयो यमो नियमनाद्धरिः ।
सूर्यः स सूरिगम्यत्वात् प्रजापत्यः प्रजापतेः ।
विशेषेणैव गम्यत्वात् ... ॥ १६ ॥

ज.टी. ॥ "एक"शब्दस्य प्रधानवाचकत्वात्, "ऋष ज्ञान" इत्यतश्च प्रधानज्ञानरूपत्वत "एकर्षिः" इत्युक्तम् । प्राधान्यं च ज्ञानस्य सर्वविषयत्वादिना ज्ञातव्यम् । 'नियमनात् सर्वस्य' इति शेषः । "सूर्यः स सूरिगम्यत्वाद्" इत्यनेन "सूरि"शब्दोपपदस्य "यत्ते रूपम्" इदमित्युक्तं भवति । 'प्रजापतेः हिरण्यगर्भस्यायं प्राजापत्य' इत्यभिसन्धाय सम्बन्धो दर्शितः — "प्रजापतेः गम्यत्वाद्" इति । तर्हि "सूर्यम्" इत्यनेन गतार्थत्वम्, इत्यत उक्तम् — "विशेषेणैव" इति । एतेन "प्रजापतेरपत्यम्" (शं.भा. १६) इति व्याख्यानं निरस्तं भवति ॥ १६ ॥

वा.प्र.॥ "सर्वविषयत्वादिना" इत्यत्र 'निरवधिकसर्वविषयत्वेन', इत्यर्थः ।

---

[7] "अतीतग्रन्थेनोक्तम्" इति "यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति" इत्याद्यतीतग्रन्थेन इत्यर्थः — श्रीरघुनाथतीर्थविरचिता विवृतिः

“सूरिशब्दोपपदस्य” इत्यत्र निरुक्तत्वादिकारलोपः । अन्यथा ‘सूरियः’ इति स्याद्? इति ज्ञेयम् ॥१६॥

## योऽसावसौ पुरुषः सोऽहमस्मि ॥१७॥

“... अहं चासावहेयतः ।
अस्मि नित्यास्तितामानात् सर्वजीवेषु संस्थितः ।
स्वयं तु सर्वजीवेभ्यो व्यतिरिक्तः परो हरिः ।
स क्रतुर्ज्ञानरूपत्वादग्निरङ्गप्रणेतृतः” ॥

— इति ब्रह्माण्डे ।

‘सत्यं ब्रह्म हृदये धारयति’, इति सत्यधर्मा ।
“एकोऽसौशब्दः प्राणे स्थित” इति ॥१७॥

ज.टी. ॥ “अहेयतः”, अहेयत्वतः । ‘न हीयत, इति अहम्’ इत्यर्थः । “नित्यास्तितामानाद्” इति नित्यसत्त्वेन प्रमितत्वादित्यर्थः । अनेन “अस भुवि”, “माङ् मान” इत्येतयोरिदं रूपम्, इत्युक्तं भवति । “अहमस्मि”शब्दोक्तत्वेऽपि न जीवैक्यं हरेराशङ्कनीयमित्याह — “स्वयं तु” इति । सर्वजीवेभ्यो व्यतिरिक्तोऽपि अहेयत्वादियोगेनैव “अहमस्मि”शब्दाभ्यामुच्यत इत्यर्थः ।

एतेन — “नाहं त्वां भृत्यवद्याचे किं नाम योऽसावादित्ये पुरुषः सोऽहमस्मि” (शं. भा. १७) इत्यपव्याख्यानं इत्युक्तं भवति । “अहमस्मि” शब्दाभिधेयत्वे हरेर्मूर्तिनियमोऽपि अस्ति, इत्याह — “सर्वजीवेषु” इति । ‘उपासकेषु’ इत्यर्थः । उपलक्षणं चैतत् । “पूषा”ऽदिशब्दैरपि आदित्यान्तर्गत एवोच्यते । अधिकारियोग्यताभेदेन खलु नानाप्रतीकेषु भगवदापरोक्ष्यमत्र प्रार्थ्यते ।

क्रतुर्मतिर्मनीषेत्यभिधानात् “स क्रतुर्ज्ञानरूपत्वाद्” इत्युक्तम् । ‘अङ्गं शरीरमप्रधानं जगद्वा नयति, इति अग्निः’ इत्यर्थः । एवं पुराणवाक्येन तात्पर्यतो व्याख्यातान् मन्त्रान् इदानीं स्ववाक्येन विशदयन् “सत्यधर्म”पदं कथं भक्तस्य वाचकम्? इत्यतः तन्निर्वक्ति — “सत्यम्” इति । ‘भक्त उच्यत’ इति शेषः । अत्र “सत्यं ब्रह्म धारयति, इति सत्यधर्मा” इत्युक्ते कथमनाधारं ब्रह्मायं धारयति?’ — इति शङ्का स्यात्, तन्निवृत्त्यर्थं ‘हृदये धारयति’ इत्युक्तम् । हृदये ब्रह्मधारणं च आदरनैरन्तर्योपेतं यद्ध्यानादिकमेव । ‘तच्च भक्तस्यैव सम्भवति’, इति भावः ।

सत्यस्य च “यथाभूतस्य धर्मस्य अनुष्ठाता” (शं. भा. १५) इति व्याख्याने

"सत्यस्यापिहितम्" इति प्रकृतपरित्यागो दोषः ॥१७॥

ततश्चायमर्थः —

'हिरण्मयमिव हिरण्मयं ज्योतिर्मयम्', 'पिबति रसान् त्रायते च जगद्', इति पात्रम् । तेन "हिरण्मयेन पात्रेण" सूर्यमण्डलेन । "सत्यस्य" सद्गुणपूर्णस्य आदित्यमण्डलान्तर्गतस्य तव "मुखम्", "पिहितम्" अस्ति । हे पूषन्, तद्वपुः त्वं "सत्यधर्माय" त्वद्विषयध्यानादिमते मह्यं "दृष्टये" — मम त्वद्दर्शनसिद्ध्यर्थम्, इति यावत् । "अपावृणु" अपगतावरणं कुरु ॥ खं. १५॥

हे "पूषन्, एकर्षे यम सूर्य प्राजापत्य" मदीयान् "रश्मीन्" "व्यूह" । तेजश्च "समूह" — स्वरूपं बाह्यं च मदीयज्ञानं विस्तारय, इति यावत् । तथा च, "यत्ते रूपं कल्याणतमं, तत्ते" प्रसादादहं "पश्यामि", इति । आदित्यरश्म्यादीनां अपगमनादिना तदन्तर्गतब्रह्मप्रतीत्यसम्भवात्, आदित्यरश्म्यादिविषयं व्याख्यानं न युक्तम् ॥ खं. १६॥

"योऽसावसौ पुरुष" इत्यत्र द्विर् "असौ" इति किमर्थम्? इत्यत आह — "एक" इति । असौ शब्दोऽसाविति शब्दः । 'इति वक्ति' इति शेषः । 'यद्यसुः प्राणः तस्मिन्' इत्यर्थः स्यात्, तर्हि अस्यान्वयो नास्ति । क्रियापेक्षत्वात् अधिकरणस्येत्यतः क्रियाध्याहारेणान्वयं दर्शयति — स्थित" इति । 'असावसौ इति वीप्सार्थतया किं न व्याख्यायत?' इति चेन्न — एवं व्याख्याने, प्राणाख्यप्रतीकान्तरस्यापि उक्तिलाभात् । एकेनापि शब्देन वीप्सासिद्धेः (वीप्सा अलाभात्) । तथा च 'योऽसौ प्रसिद्धोऽसौ प्राणे स्थितः पुरुषः स एव अहेयत्वनित्यसत्तामानाभ्यामहमस्मिशब्दाभिधेयः तं च पश्यामि' इति वाक्यार्थः । अथ वा, पूषादिशब्दैः उपलक्षणया प्राणाद्यनेकप्रतीकस्थत्वं विष्णोरुक्तम्, तत्र भेदशङ्कायामिदमाह । 'सर्वप्रतीकेषु स्थितः, एक एव', इत्यर्थः ॥ खं. १७॥

वा.प्र.॥ "सोऽहमस्मीत्यपव्याख्यानम्" इत्यत्र एवमभेदपरतया व्याख्याने जीवब्रह्मणोरैक्यमेकस्मिन् प्रार्थ्यप्रार्थकभावायोगाद् युक्तिविरुद्धम् । इदानीं व्यावहारिकभेदोऽस्ति मुक्ति ऐक्प्राप्तेः उभयोपपत्तिरिति तु "अस्मि" इति लटा विरुध्यते, तस्य वर्तमानैक्यप्रतिपादकत्वात्, "वर्तमाने लट्" (अष्टा. ३.२.१२३) । एतेन "अहं ब्रह्मास्मि" (बृ.उ. १.४.१०), "तत्त्वमसि" (छा.उ. ६.८.७, ६.९.४, ६.१०.३, ६.११.३, ६.१२.३, ६.१३.३, ६.१४.३, ६.१५.३, ६.१६.३) इत्यादावपि अनुपपत्तिर्दर्शिता । किं च जीवस्य स्वदेहपाते सति, यः श्वासनियामको वायुः, अनिलं 'अकाराख्यः परमात्मा निलं निलयनं आधारो यस्य तदनिलम्

तस्य वायोः स्वरूपं अमृतम्', इति वायोरमृतत्वमुक्त्वा "तदाधारतया अनिलम्" इत्यत्र अकारपदेनोक्तस्य तदाधारस्य हरेः सुतराममृतत्व चार्थत उक्तम् । अथ 'मरणानन्तरं इदं मम शरीरं भस्मान्तं भवति', इति स्वयं मृतत्वोक्तेश्च कथं मृतामृतयोः ऐक्यं स्यात्?

प्राग् ब्रह्मणो "अकायमव्रणम्" इति, "शुद्धमपापविद्धम्", इति च प्राकृतदेहोपेताशुद्धपापविद्धजीवेभ्यो वैलक्षण्योक्तेश्च कथमभेदः? "यत्ते रूपं कल्याणतमम्" इति "कल्याणतम"पदेन भगवतो जीवेषु असम्भावितज्ञानादिगुणभरितातिशोभनदिव्यदेहकथनाच्च कथमभेदः? "तद्धावतोऽन्यानत्येति तिष्ठत्" इति भगवतः सर्वगतत्वस्य अनन्तमूर्तिग्रहणाख्याचिन्त्यशक्त्या एकमूर्त्या स्थितेः बहुमूर्तिभिश्च परितो धावत्सकलजीवात्ययनाख्यविचित्रसामर्थ्यस्य च कथनात् । अणुभ्योऽसमर्थेभ्यश्च जीवेभ्यो महासमर्थस्य सर्वगतस्य हरेः कथमभेदो भवेत्? न हि कुण्डलिनामधीश्वरोऽनन्तः डुण्डुभो भवति । नापि घटो गगनं भवति । अपि च तस्माद् 'अन्यदेजति तन्नेजति' इत्युपक्रम एव भयाभयाख्यविरुद्धधर्मकथनाच्च कथमेकता स्यात्?

न हि भवति भीरुहरिणशिशुः क्वापि भयरहितो हर्यक्षः । तस्माद् उपनिषदभिमानिनी सकलजगतो माता मङ्गळदेवता लक्ष्मीः "यो नः पिता" (ऋग्वेद १०.८२.३०) इत्यादिश्रुत्युक्तसकलजगत्पितुः स्वकमितुः "शम्भोः पितामहो ब्रह्मपिता शक्राद्यधीश्वर" इत्यादिना तत्पुत्रपौत्रदासत्वादिनोक्तब्रह्मादिजीवसमुदायैक्यं कथं ब्रूयात्? किन्तु एव पूर्वोत्तरमजानन् विपरीतं च जानन् कुवाद्येव बलीवर्दो वा गर्दभो वा श्वा वा कपिर्वा इत्येतादृशमिथ्याज्ञानाद् दुर्योनिषु पततः स्वस्यैव हीनजीवैक्यं वदेत् । तथा च श्रुतिः — "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा यद्यद् भवन्ति तत्तदा भवन्ति" (छा.उ. ६.९.३, ६.१०.२) । कस्तर्हि "योऽसावसौ पुरुषः सोऽहमस्मि" इति वाक्यार्थ — इति चेत्, सत्यम् ।

ब्रूमः तस्यार्थम्, सावधानेन श्रूयताम् । उक्तविधया अनेकविरुद्धधर्मिणोः ऐक्यायोगादादौ त्वद्दत्तधनभोक्तृत्वेनोक्तो योऽसौ पुरुषः, तदनन्तरं त्वद्विषयकपूजारूपनिष्कामकर्मकर्तृत्वेनोक्तो योऽसौ पुरुषः, तदनु सूर्यस्थितभगवदपरोक्षज्ञानं प्रार्थयमानो योऽसौ पुरुषः, अन्ते "अग्ने नय" इति मोक्षं प्रार्थयमानो योऽसौ पुरुषः "सोऽहम्" एतदुपनिषदधिकारी जीव एवास्मि । त्वद्दत्तधनभोक्तृत्वात् त्वद्दर्शनकामुकत्वात् त्वत्तः परमपुमर्थमोक्षमर्थयमानत्वाच्च, न तु उपनिषत्प्रतिपाद्यदेवता त्वमेवास्मि । दातृप्रतिगृहीत्रोः पूज्यपूजकयोः शिष्याचार्ययोः द्रष्टृदृश्ययोः मोच्यमोचकयोः

अधिकारिविषययोश्च भेदावश्य सम्भवात् इत्यनुपमृद्यपदमहिम्नैव जीवब्रह्मणोः अत्यन्तभेदाख्यार्थसिद्धेः प्रतिवादिनो मुखमुद्रणमेव — इति । न हि याचको दरिद्रः याच्यमानमहाराजं प्रति 'त्वमेवाहमस्मि' इति क्वचिद् ब्रूते? तस्मात्, तत्प्रकरणानुकूलत्वात् अस्मदीयार्थ एव प्रेक्षावद्भिः आदरणीयः, न तु प्रकरणविरुद्धः परकीयोऽर्थः, इति सन्तोष्टव्यमायुष्मता ।

किं च — "वायुरनिलममृतम्" इति वाक्यशेषे वायोः प्रस्तूयमानत्वात्, योऽसावसौ वायौ पुरुषः वायुहृदि स्थितो नारायण इत्यर्थः । सोऽहं रुद्रादिवदसुरवेधाभावात् रुद्रादिदेवैः वा धात्रा वा तेन वायुना वा कदाऽपि अहेयत्वादविस्मर्यमाणत्वादिति यावत् । "अहम्" इत्युच्यमानं परं ब्रह्म, "नामानि सर्वाणि यमाविशन्ति" (भाल्लवेयश्रुतिः) इति च श्रुतेः । तथा प्रळयेऽपि अविलुप्तज्ञानवत्वेन अस्तित्वोपलक्षितसकलगुणवत्तया तेनैव वायुना सदा प्रमितत्वाद् "अस्मि" इति पदेनापि उच्यमानं परं ब्रह्म । अत एव 'यो विष्णुः तस्य अकारवाच्यस्य परमात्मनः वायुः निलं निलयनं सन्निधानपात्रीभूतं रूपम्' । अथ जीवमरणानन्तरमपि "अमृत" मृतिरहितम् । 'नित्यामृतश्रीहरेः सन्निधानात् जीवानां मरणावस्थायामपि आ ब्रह्मलयं मृतिरहितम्' इति भावः । इदं जीवानां शरीरं मरणे सति वारं वारं दह्यमानं "भस्मान्तम्" भस्म भस्मीभावः अन्ते अवसाने यस्य, तत्तथोक्तम्, "अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः" इति भारते । एवं च, देहिनां देहपातेऽपि मरणाभावेन सर्वजीवोत्तमत्वात् नित्यापरोक्षज्ञानित्वेन हरेरतिप्रियत्वात् कल्यादीनां वेधविधुरत्वेन कदाऽपि हरौ वैमुख्याभावाच्च वायुप्रतीकमेव वागादिसकलप्रतीकेभ्योऽपि अधिकतमं (अधिकं अत) एकऋष्यादिपदवाच्य — हे हरे, तस्मिन् वायौ क्रियमाणहरिध्यानादेः कल्याद्यसुरकृतविघ्नाभावात्, तत्रैव त्वामुपास्य "यत्ते रूपं कल्याणतमं, तत्ते पश्यामि" इति पूर्वेणान्वयः । अत एव छन्दोगानामुपनिषदपि —

"य एवायं मुख्यप्राणस्तमुद्गीथमुपासाञ्चक्रिरे तं हासुरा ऋत्वा विदध्वसुः" (छा.उ. १.२.७)

— इति निरन्तरायोपास्तिं वायावाह ।

एवं च उपनिषदभिमानिनी रमा हनुमदवतारे स्वोपकारकं, स्वज्येष्ठपुत्रं मुख्यप्राणं मानयन्ती हरिं स्तौति, इत्येकवाक्यतया मनोहरार्थाख्यामृतलाभे कः प्रेक्षावान् विषसम्पृक्तान्ने रतिं कुर्यात्? कश्च प्रेक्षावानुपनिषत् प्रतिपाद्यदेवतास्तुतिप्रस्तावे "निन्दामि च पिबामि च" इति न्यायेन

तमौपनिषदं महापुरुषं नीचतममेन जीवेनैकीभूतं वदेत्? तस्मान्न परकृतेयं व्याख्या किन्तूपनिषदां प्रत्याख्यैवेति युक्तमुत्पश्यामः । इदं च स्वोक्ततत्त्वोपोद्बलनं “दशार्थाः सर्ववेदेषु” इति निरूपयतो, मम हृदि स्थित्वा मामनुदिनं प्रेरयतः “अयमिह सुमतिं वायुदेवो विदध्याद्” (हरिवायुस्तुति ५) इति मया स्तूयमानस्य पवनस्य गुरोरेव अभिसन्धिरित्यनुसन्धेयम् ।

“यथाभूतस्य धर्मस्यानुष्ठात्र” इत्यत्रोपनिषदुपक्रमे “तेन त्यक्तेन” इति ज्ञानिनः सकलकर्मत्यागमुक्त्वा इदानीं यथास्थितधर्मस्य अनुष्ठात्रे इति कथने स्ववचनविरोधस्चेत्यपि द्रष्टव्यम् । “आदित्यरश्म्यादिविषयं व्याख्यानम्” इत्येतदुदयेऽस्तसमये च तव मते, प्रतिबन्धकत्वाभिमतरश्मिरहितमण्डले ब्रह्मदर्शनप्रसङ्गादनुपपन्नम् । सौरं तेजः “सूर्यकोटिप्रतीकाशम्” इति स्मृतेः अनन्तसूर्यप्रकाशेभ्योऽपि अधिकभगवत्प्रकाशं, सूर्यतेजोभिभूतो दीपः स्वाभिभावकसौरं तेज इव कथं विरुद्ध्यात् । न हि भवति तरक्षोः मृगीशवः प्रतिबन्धकः, किन्तु ‘स्वाव्यक्तत्वशक्त्यैव भगवान् तत्र न प्रतीयते, श्रवणादिना प्रसन्नः सन् प्रतीयत’ इत्येव वक्तव्यम् ।

तस्मात् परोदीरितव्याख्या अपव्याख्या एव । “एकेनापि शब्देन वीप्सासिद्धेः” इत्यत्र ‘यो धूमवानसौ वह्निमान्’ इत्युक्तत्वेऽपि वीप्साफलव्याप्तिसिद्धेः । अत एव श्रुतिः — “ब्राह्मणो न हन्तव्य” इत्येवाह, न तु ‘यो यो ब्राह्मणोऽसावसौ न हन्तव्य’ इत्याह । नाना प्रतीकेषु स्वदर्शनं प्रार्थयमानस्य उपासकस्य ॥१७॥

## वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ॥१८॥

यस्मिन् प्राणे[8] (यस्मिन्नयम्) स्थितः सोऽप्यमृतः । किमु परः ?

अः, ब्रह्मैव निलयनं वायोः सोऽनिलम् ।

> “अतिरोहितविज्ञानाद् वायुरप्यमृतः स्मृतः ।
> मुख्यामृतः स्वयं रामः परमात्मा सनातनः” ॥

— इति रामसंहितायाम् ।

---

[8] प्राचीनपाठे प्रथमतत्पदेन भगवान् । द्वितीयेन प्राण उच्यते । यस्मिन् सोऽपीति । प्राणे भगवान् स्थित इति भगवानेव प्राणस्य निलयनमाश्रय इति चार्थतोऽविशिष्टम् । यद्वा अस्य निलयनमिति विग्रहेण प्रथमव्याख्या । अः निलयनं यस्येति चार्थान्तरमुदितं भवति — बन्नञ्जे गोविन्दाचार्यः

ज.टी. ॥ "वायुरनिलममृतम्" इत्येतद्वाक्यं मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वा अधिदैवमात्मानं अनिलममृतं प्रपद्यताम् । 'अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयाद्' इति केचिद्व्याचक्षते, तदसत् । अवश्यम्भाविन्यर्थे प्रार्थनानुपयोगात् । प्रकरणादपि उपपत्तेर्बलीयस्त्वात् । अतो, लिङ्गव्यत्ययेन विभक्तिव्यत्ययेन (विभक्तिव्यत्यासेन) वा समानाधिकरणानि एतानि पदानि ।

'ननु तर्हि प्रकृतासङ्गतानि स्युः? "वायुरनिलम्" इति पुनरुक्तिः स्याद्?' इत्यत आह — "यस्मिन्" इति । यस्मिन् वायौ अयं परमेश्वरः । 'सोऽपि वायुरपि अमृतः किमु परोऽमृत इति वक्तव्यम्' इति शेषः ।

ननु अस्मिन् वाक्ये, "वायुरमृतम्" इत्येवोच्यते, न तु 'यस्मिन् वायौ अयं स्थितः' इति, तत् कुतः कैमुत्यं लभ्यते? न हि वायोरमृतत्वमात्रेण ईश्वरामृतत्वसिद्धिः — इति चेत्? मैवम् । अस्यार्थस्य "अनिल"पदेन उक्तत्वात् । तत्कथमित्यतः तात्पर्यतो व्याख्यातं तदिदानीं निर्वक्ति, "अः ब्रह्मैव" इति । निलं निलयनं, आश्रयः । यथा श्रुतस्य अनुवादोऽयं, इत्यतो "अनिलम्" इत्युक्तम् । अनेन पुनरुक्तिरपि परिहृता भवति ।

ननु 'यस्मिन्नयं स्थितः' इत्यनेन वायुरीश्वराश्रय इत्युक्तम् । अनेन निर्वचनेन 'ईश्वरो वायोराश्रय' इति लक्ष्यते । 'तत्कथं अनिलपदार्थोऽसौ?' इति चेन्, मैवम् । 'यस्मिन्नयं स्थित' इत्यनेनापि 'यस्मिन् वायो अयं परमेश्वरो नियामकत्वेन स्थित' इति वायोरीश्वराश्रितत्वस्यैव कथितत्वात् ।

अथवा, 'यस्मिन् परमेश्वरे अयं वायुः स्थितः यदधीनो वर्तत', इति यावत् । 'स वायुरपि यदा अमृतः, तदा किमु वक्तव्यं स परोऽमृत' इति व्याख्येयम् ॥१८॥

ततश्च इदमुक्तं भवति —

"सोऽहमस्मि" इति जीवान्तर्गतस्य परमेश्वरस्य नित्यास्तित्वं कल्याणतमरूपत्वं चोक्तं, तन् न अयुक्तम्, प्रत्यक्षत एव देहस्य भस्मान्तत्वदर्शनात् । देहनाशे च तदन्तर्गतस्य परमेश्वरस्य जीववन्मरणाद्यवश्यंभावात्, इति आशङ्कायां इदमुक्तम् — "वायुरनिलम्" इति । अयमर्थः — यद्यपीदं शरीरं भस्मान्तं, तथापि तदन्तर्गतस्य परमेश्वरस्य न मरणादिदोषप्रसङ्गः । कुतः? अनिलः — 'परमेश्वराश्रितो वायुरपि यदाऽमृतः, अथ तदा परमेश्वरः किं वक्तव्य?' इति तदमृतत्वस्य कैमुत्यसिद्धत्वाद् — इति ।

'ननु संसारिणो वायोः कथममृतत्वं सम्भवति? यदि उपचारेण, तर्हि ईश्वरस्यापि किं तथाविधममृतत्वमस्ति?' इत्याशङ्कां स्मृत्यैव परिहरति — "अतिरोहित" इति । 'देहनाशेऽपि तत्कार्यविज्ञान तिरोभावाभावसादृश्याद्', इत्यर्थः । "अतिरोहितविज्ञानाद्" इति भावप्रधानो निर्देशः । "मुख्यामृतः" देहनाशादिरहितः । "परमात्मा सनातन" इति तत्र युक्तिद्वयम्[9] ॥ १८ ॥

---

[9] "परमात्मा" इति — 'वायुर्गौणामृतत्वमङ्गीकृत्य, तर्हि अमृतत्वेन कैमुत्यलाभमीश्वरामृतत्वमपि तादृशमेव स्याद्' इत्याशङ्क्य विष्णोर्मुख्यामृतत्वे युक्तिद्वयमित्यर्थः । अयमभिप्रायः — सकलशरीरान्तर्गतस्य परमेश्वरस्य शरीरनाशादिना मरणादिदोषौ नाशङ्कनीयः । कुतः? यतः परमेश्वराश्रितस्य मुख्यवायोः तत्प्रसादेन स्वीयप्राकृतशरीरनाशेऽपि अमृतत्वमेवोच्यते । तदा "किमु वक्तव्यम्"? पूर्णशक्तिचिदानन्दमूर्तेरप्राकृतविग्रहस्य परमोत्कृष्टचेतनस्यानादेः भगवत इतरसर्वशरीरेषु नियामकत्वेनास्थितस्य तन्नाशादिना मरणाद्यवद्यगन्धलेशोऽपीति । अत एव भगवान् आत्मा श्रुतेर्नित्यत्वाच्च ताभ्यां इति मुख्यनित्यतामेवाह । अनेनैव न सर्वशरीरगस्य विष्णोर्जीववद्दुःखादिदोषप्रसङ्गः । तथा च "शुक्रम्" इत्यादि विशेषणानि अयुक्तानीति च परास्तम् । अत एव "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" (ब्र.सू. १.२.८) इत्यनेनाशेषात्माधिपतिः बादरायणोऽपि सर्वत्रोच्यमानस्य नारायणस्य जीवेन सह शरीरेऽवस्थितौ समानभोगप्राप्तिमाशङ्क्य सामर्थ्यवैशेष्यादिना निराचकार । 'सर्वज्ञाल्पताभेदात् सर्वशक्त्यल्पशक्तितः । स्वातन्त्र्यापारतन्त्र्याभ्यां सम्भोगो नेशजीवयोः" ॥ इति च भाष्यम् । शरीरोत्पत्तौ तदन्तर्गतस्य भगवतो जनिप्रसङ्ग इत्यप्यनेन न्यायेन परास्तम् । "स प्राणमसृजत" (प्र.उ. ६.४) इत्यादिना देहत उत्पत्तिमत्तया प्रमितस्यापि "सा वा एषा द्वतानादिर्येयं पवत" इत्यादिना यदा ज्ञानाविस्मृतेर्हेतोरनुत्पत्तिरेवोक्ता । तदा किं वाच्यम्? स्वतन्त्रस्य परमात्मनः कथमपि जनिर्नास्तीति । अत एव शारीरकमीमांसायां "एतेन मातरिश्वा व्याख्यातः" (ब्र.सू. २.३.८) इति सूत्रेण वायूत्पत्त्यनुत्पत्तिश्रुतेर् देहोत्पत्तिज्ञानाविस्मृतिभ्यां व्यवस्था कृता भगवता । यथाऽह भगवान् भाष्यकारः — "ज्ञानाविस्मृत्या वा वायावपि व्यवस्थेत्यतिदेश" इति । बह्वचोपनिषदि "स एष मृत्युश्चैवामृतं च तदुक्तमृषिणा अपाञ् प्राङेति स्वधया गृभीत" (ऐ.उ. २.१.८) इत्यादिना महिदासाभिधेन प्रभुणोदाहृतमन्त्रव्याख्यानावसरे "अमर्त्योऽमर्त्येनासयो निरित्यंशोऽमरशीशशरीरैः सहावस्थिता वायुदेवता अमृतत्येवं परतयावृतः" । तथा च भाष्यम् "अमर्त्यः तत्प्रसादेन वायुर्देवैस्सह स्थित" इति । तत्रापि, "अतिरोहित" इत्युक्तन्यायेन शरीरकृतलेपाभावेनामृतत्वं बोध्यम् ।
— श्रीपूर्णबोधाचार्यशिष्यनृसिंहाचार्यकृतं विवरणम्

ॐ क्रतो स्मर कृतꣳ स्मर ।
ॐ क्रतो स्मर कृतꣳ स्मर ॥ १९ ॥

"भक्तानां स्मरणं विष्णोर्नित्यज्ञप्तिस्वरूपतः ।
अनुग्रहोन्मुखत्वं तु नैवान्यत् क्वचिदिष्यते" ॥

— इति ब्रह्मतर्के ॥ १९ ॥

ज.टी. ॥ अथ प्रणवप्रतीकं प्रार्थयते — "ॐ" इति । 'ओतत्वादिगुणयुक्तक्रतो मां स्मर । मया कृतं ध्यानादिकं च स्मर' — इति । अभ्यासस्तात्पर्यार्थः । अत्र 'स्मरणं नाम प्रसिद्धमेव' इति प्रतीतिं स्मृत्यैव परिहरति — "भक्तानाम्" इति । 'भक्तकर्मकं यद्विष्णोः स्मरणं तदनुग्रहोन्मुखत्वमेव विष्णौ यः स्मरणशब्दः प्रयुज्यते, स स्मरणकार्यानुग्रहोन्मुखत्व एव लक्षणया वर्तत' इति यावत् । 'नैवान्यत् संस्कारकारणकं ज्ञानम्' इत्यर्थः । न केवलं भक्तविषय एवं, किन्तु सर्वत्रापि, इत्युक्तम् — "क्वचिद्" इति । कुतः? "नित्यज्ञप्तिस्वरूपतः" । 'स्मरणं हि अनुभवनाशे तज्जन्यसंस्कारसहकृतेन मनसा जायते, ईश्वरश्च नित्यज्ञानस्वरूप इति तस्य स्मरणासम्भवात् लक्षणाश्रयणम्' — इति भावः ॥ १९ ॥

वा.प्र.॥ "विभक्तिव्यत्ययेन" इत्यत्र "वायुः" इति प्रथमायाः "सुपां सुलुक्" (अष्टा. ७.१.३९) इति वचनात् द्वितीयाकरणे "वायुमनिलममृतम्" आहुरिति योजनासम्भवात् । लिङ्गव्यत्यासे तु "वायुरनिलः अमृत" इति योजनासम्भवादिति भावः । "प्रकृतासङ्गतान्" इत्यत्र भगवत एव प्रकृतत्वेन वायोः कथनं कथं सङ्गच्छत इति शङ्कितुरभिप्रायः ॥ १८ ॥ १९ ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥२०॥२॥

वयुनं ज्ञानम् । "त्वद् (यद्) दत्तया वयुनयेदमचष्ट विश्वम्" (भा.पु. ४.९.८) इति वचनात् । "जुहुराणं" "अस्मान्" अल्पं[10] कुर्वत् (अल्पीकुर्वत्) । "युयोधि" वियोजय ।

"यदस्मान् कुरुतेऽत्यल्पांस्तदेनोऽस्मद् वियोजय ।
नय नो मोक्षवित्तायेत्यस्तौद् यज्ञं मनुः स्वराड्" ॥

— इति स्कान्दे ।

"युयु वियोगे" इति धातुः । भक्तिज्ञानाभ्यां "भूयिष्ठां" "नम" इत्युक्तिं "विधेम" ॥२०॥२॥

ज.टी. ॥ साक्षात्कारप्रार्थनानन्तरमग्निप्रतीकं भगवन्तं मोक्षार्थं प्रार्थयते, "अग्न" इति । 'वयुनानि कर्माणि' इति केषाञ्चिद् व्याख्यानम् — तदसत् । मोक्षस्य कर्मसाध्यत्वाभावेन तदुक्तेः वैयर्थ्यप्रसङ्गादित्यभिप्रेत्य "वयुन"शब्दार्थमाह — "वयुनम्" इति । 'वयुनशब्दस्य ज्ञानवाचित्वं कुतः?' इति चेत्, प्रयोगं दर्शयति — "त्वद्दत्तया" इति । "जुहुराणं कुटिलम्" (शं.भा. २०) इति अन्यथाप्रतीतिनिरासाय आह — "जुहुराणम्" इति । "अस्मान्" इत्यन्वयसिद्ध्यर्थमावर्तितम् । युयोधीत्यप्रतीतार्थपदं व्याख्याति — "युयोधि" इति ।

'कुतोऽयं पदद्वययार्थः?' इत्यतः 'समाख्यानाद्', इत्याह — "यद्" इति । "युयोधि" इत्यस्य वियोगार्थसिद्धये धातुसूत्रमपि पठति — "युयु वियोग इति धातुः" इति । 'धातुव्याख्यानम्', इत्यर्थः । नम उक्तेर्भूयिष्ठत्वं अभ्यस्तत्वमतोऽभ्यधिकार्थं वदन् नमस्कारस्य कथमुक्तित्वम्? इत्याशङ्कां परिहरति — "भक्ति" इति ॥२०॥

ततश्चायमर्थः —

हे "अग्ने", "अस्मान्" "सुपथा" पुनरावृत्तिवर्जितेन अर्चिरादिमार्गेण, राये मोक्षाख्यवित्ताय "नय" । कुतः? 'हे देव अस्मदनुष्ठितानि विश्वानि

[10] प्राचीनपाठे अल्पमिति क्रियाविशेषणम् — बन्नञ्जे गोविन्दाचार्यः

सम्पूर्णानि मोक्षाय पर्याप्तानि' इति यावत् । "वयुनानि" ज्ञानानि भवान् वेद । प्रारब्धकर्मभिः बद्धस्य कथं मोक्ष? इत्यत उक्तम्, "युयोधि" इति । 'अस्मान् जुहुराणमल्पीकुर्वत्, संसारे परिवर्तयद्' इति यावत् । 'एनः पापमनिष्टं कर्म', इति यावत् । 'अस्मद् युयोधि । अस्मत्तो वियोजय । वयं तुभ्यं भूयिष्ठां नम उक्तिं विधेम । न तु तत्प्रतिकर्तुं शक्नुम' इति ॥ २०॥

वा.प्र.॥ मोक्षप्राप्तये "तेऽर्चिषमभिसम्भवन्ति" (छा.उ. ५.१०.१) इति श्रुत्युक्तार्चिर्नामकाग्निकुमारलोकस्य अग्निशिखाद्वारा प्राक्प्राप्यत्वात् । गजतुरगशिबिकादिना राजमन्दिरं गच्छतोऽपि नदीनिरोधपरिहाराय नद्युत्तारकपुरुषप्रार्थनवत्, राजान्तःपुरप्रवेशाय प्राक्प्रतिहारप्रार्थनवद्वा "अग्ने नय" इत्यग्निस्थभगवत्प्रार्थनम्, इति भावेनाह "अग्निप्रतीकम्" इति । यद्वा "कुर्वन्नेवेह कर्माणि" इति कर्मानुष्ठानस्योक्तत्वात् कर्मानुष्ठातृणां च "अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः", इति स्मृतेः 'अग्नेरपेक्षिततत्वाद् अग्निप्रार्थनम्' इति ज्ञातव्यम् ॥ २०॥

नियुङ्क्ते देहिनो योऽन्तः स्वयं भुङ्क्ते सुखानि च ।
तदन्ते मुक्तिदस्तं ते भजन्ते चिन्तितार्थदम् ॥

ग्रन्थेनानेन भगवानिन्दिरारमणः प्रभुः ।
नन्दितीर्थमुनेर्बन्धुः स दद्यात्सकलेप्सितम् ॥

इति श्रीमज्ञावीसमीरवादिराजपूज्यपादविरचिता

॥ ईशावास्योपनिषद्भाष्यटीकाप्रकाशिका समाप्ता॥

**पूर्णशक्तिचिदानन्दश्रीतेजः स्पष्टमूर्तये ।**
**ममात्यधिकमित्राय नमो नारायणाय ते ॥**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं याज्ञीयमन्त्रव्याख्यानं सम्पूर्णम्

ज.टी. ॥ अथ समापितभाष्योऽपि भगवानाचार्यो "यत्ते रूपं कल्याणतमम्" (ई.उ. १६), "योऽसावसौ पुरुष" (ई.उ. १७), इत्यादिना प्रतिपादितं नारायणं स्तुतिनतिभ्यां प्रीणयति — "पूर्ण" इति ।

'पूर्णशक्तिचिदानन्दश्रीतेजांस्येव मूर्तिः यस्य' इत्युक्ते, 'करचरणादिमान् विग्रहो नास्तीति प्रतीतिः स्यात्?' अत उक्तं — "स्पष्ट" इति । स्पष्टा

प्रसिद्धा । 'करचरणादिमति' इत्यर्थः । "अभ्यधिकमित्रम्" निरतिशयोपकारकम्, अतिपरमप्रीतिविषयश्च, इति ॥

कमलावदनाम्भोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

इति श्रीमज्जयतीर्थभिक्षुविरचितं याज्ञीयमन्त्रभाष्यविवरणं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु

---

("न च रमन्ति" इति श्लोकस्य भागवततात्पर्यनिर्णये कृतं व्याख्यानम्)

न च रमन्त्यहो असदुपासनयाऽऽत्महनो
यदनुशया भ्रमन्त्यभवाः कुशरीरभृतः ।
निभृतमोक्षहृदययोगयुजो हृदयं
मुनय उपासते तदरयोऽपि ययुः ॥

अन्यथोपासनयाऽऽत्महनोऽसुर्यान् नाम लोकान् नित्यनिरतिशयदुःखान् निरस्तसमस्तसुखान् प्राप्नुवन्ति । तदेतन् "न च रमन्ति", अनुभवन्ति च नित्यदुःखमिति "च"शब्देनोक्तम् । "असुर्य"शब्देन च श्रुतौ । सुष्ठु अरमणरूपत्वादसुरप्राप्यत्वाच्च । यत्रानुशयनं कुर्वन्तस्तमस्येव भ्रमन्ति । "अभवा" जन्मवर्जिताः । "आत्महन" इत्येष शब्दो भगवद्भक्तद्वेषिणामपि सम, इति दर्शयति — "निभृतमोक्षहृदययोगयुज" इत्यादिना । ये मुनयो हृद्ययनं भगवन्तं निभृतमोक्षहृदयेन वायुना योगेन युक्ता नियमिताः सन्त उपासते तेषामरयोऽपि तदेव तमो ययुः । परिपूर्णं मोक्षार्थं ज्ञानं यस्य, स निभृतमोक्षहृदयः ।

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" ॥ — इति श्रुतिः (ई.उ. ३) ।

"नित्यदुःखसुसम्पूर्णं निरस्तानन्दमव्ययम् ।
तमो यान्त्यन्यथाज्ञानाद् द्वेषाद् वा हरिसंश्रये" ॥ — इति प्रमाणसंहितायाम् ।

"निभृतो मोक्षवित् प्राणस्तद्योगात् तत्प्रसादतः ।
जानन्ति परमं देवं नान्यथा तु कथञ्चन" ॥ — इति भागवतसंहितायाम् ॥

श्रीराघवेन्द्रयतिविरचितः

## श्रीमदीशावास्योपनिषत्खण्डार्थः

ॐ ॥ श्रीप्राणपतिमानम्य पूर्णबोधादिदेशिकान् ।
ईशावास्योपनिषदः करिष्याम्यर्थसङ्ग्रहम् ॥

अस्या उपनिषदः स्वायम्भुवो मनु ऋषिः । यज्ञनामा हरिर्देवता । अनुष्टुबादि यथायोग्यं छन्दो ज्ञेयम् । "अनेजद्" इत्यादिना तत्त्वं विवक्षुरुपदिष्टं तत्त्वं अधिकारिण एव हि हृद्यवतिष्ठते, नान्यस्य, इति एतदुपनिषदधिकारसिद्ध्यर्थं विच्छिन्नविषयतृष्णत्वं तावदाद्येन मन्त्रेण सयुक्तिकं विधत्ते —

ॐ ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥

"यत्किञ्च" जगदिदं तत्सर्वं प्रवृत्त्यर्थं आत्मनि "ईशावास्यम्" । आवासमर्हति, इति आवास्यम् । ईशस्य आवास्यं "ईशावास्यं", 'ईशानुप्रविष्टम्' इत्यर्थः । "तदेवानुप्राविशद्" इत्यादेः । 'अतोऽस्वतन्त्रम्' इति भावः । किञ्च "जगत्यां" प्रकृताविदं सर्वमाश्रितम् । सा च ईशायत्ताऽतोऽपि अस्वतन्त्रम् । ईश एव स्वतन्त्रः । तेन कारणेन "तेन" ईश्वरेण "त्यक्तेन" दत्तेन वित्तेन । 'यदृच्छालब्धेन', इति यावत् । "भुञ्जीथाः" भोगं कुर्याः । "कस्यस्वित्" कस्यापि राजादेः सकाशात् "धनं" "मा गृध", नाऽकाङ्क्षेथाः । 'ईशादन्यस्यास्वातन्त्र्येण तस्य दाने सामर्थ्याभावाद्, ईशदत्तेनैव वर्तेत' — इति भावः ॥१॥

'तृष्णाविच्छेदवत्, स्वोचितकर्मानुष्ठानमपि ज्ञानार्थिनां आवश्यकम्', इत्याह —

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

"शतं समाः", शतं वर्षाणि । "कालाध्वनोरत्यन्तसंयोगे" (अष्टा. २.३.५) इति द्वितीया । इह मानुषादिजन्मनि यावज् "जिजीविषेत्" जीवितुमिच्छेत् तावत् "कर्माणि" "कुर्वन्नेव" — 'आमरणं भगवत्पूजात्मकानि असङ्कल्पितफलानि स्वोचितानि कर्माणि सर्वथा कुर्याद्' इति यावत् ।

कुतः? एवं कर्माणि कुर्वति नरे मनुष्यमात्रेऽपि त्वयि कर्म पापं न लिप्यते । स्वोचितेन असङ्कल्पितफलेन कर्मणा भगवत्पूजां कुर्वन्तं अल्पाधिकारिणामपि न प्रागुत्तराणि पापानि बाधन्ते । 'ततश्च ज्ञानाधिकारी स भवति' इति यावत् । इतःकर्मकरणात् 'अन्यथा अकरणे कर्म पापं न लिप्यत' इति नास्ति । 'भगवत्पूजामकुर्वन्तं पापानि बाधन्त एव । ततश्चासौ ज्ञाने न अधिक्रियते । अतश्च कर्माणि कुर्याद्' — इति ।

पुरुषार्थनये, "नियमाच्च" (ब्र.सू. ३.४.७) इति सूत्रभाष्यादौ "नरे ज्ञानिन्यपि त्वयि कर्म न लिप्यत इति नास्ति" इति 'अपरोक्षज्ञानिनोऽपि कर्माकरणे मुक्तौ आनन्दह्रासरूप पापकर्मलेपो अस्त्येव', इति ज्ञानिपरतया मन्त्रो व्याख्यातः ॥ २॥

एवं प्राप्ताधिकारं प्रति परमात्मतत्त्वबुभुत्साजननाय विपरीतज्ञानिनो निन्दायां आह —

> असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
> ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३॥

सुष्ठु रमणं सुर्यम् । सुपूर्वस्य रमतर्ईयप्रत्ययः तद्विरुद्धं असुर्यं महादुःखम् । असुर्यमेषु अस्तीत्यसुर्याः । अर्श आद्यच् प्रत्ययान्तोऽयम् । महादुःखवत्त्वाद् "असुर्याः" । असुरप्राप्यत्वाद् वा "असुर्याः" ।

"अन्धेन तमसाः" अन्धयतीति व्युत्पत्त्या, निबिडान्धकारेण इत्यर्थः । 'आवृतास्ते प्रसिद्धा यः' इति शेषः । लोकास्तान् "प्रेत्य" मृत्वा "अभिगच्छन्ति" ।

'ते क?' इत्यत उक्तं, "य" इति । "आत्महनः" — 'यथावद् आत्मानमज्ञात्वा वैपरीत्येन जानन्तो, ये केचन वर्तन्ते ते सर्वेऽपि अभिगच्छन्ति', इति । "नाम" — 'निश्चितमेतद्', इत्यर्थः ॥ ३॥

> अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
> तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४॥

इदानीं परमात्मतत्त्वमुपदिशति, "अनेजद्" इत्यादिमन्त्रद्वयेन । तत्परमात्मस्वरूपं अनेजत् । "एजृ कम्पने" । 'अकम्पमानं निर्भयत्वाद्', इति भावः । "एकं" प्रधानम् । "मनसो"ऽपि "जवीयः" वेगवत्तरम् । "एनत्" परब्रह्मस्वरूपं "देवाः" न "आप्नुवत्" साकल्येन न व्यजानन् ।

'ब्रह्म तु "पूर्वं" अनादिकालं स्वभावतं', इति यावत् । "अर्षत्", "ऋष ज्ञाने" सर्वं व्यजानत् । आडागमाभावच्छान्दसः (आडागमाभावश्छन्दसः) । "तद्" ब्रह्म "तिष्ठत्" विद्यमानमेव (विद्यमानेव) सद् "धावतो", वेगेन गच्छतो "ऽन्यान्" जनान् "अत्येति" अतिक्रम्य वर्तते । 'अचिन्त्यशक्तित्वात्, सर्वगतत्वाच्च', इति भावः । "तस्मिन्" हरौ "मातरिश्वा" मुख्यवायुः आसमन्तात् पालयन्तीति व्युत्पत्त्या अपः कर्माणि । 'स्वप्रेरणया प्राणिभिः क्रियमाणानि पुण्यकर्माणि "दधाति" समर्पयति' — इति ॥ ४ ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ ५ ॥

"तद्"इति पञ्चम्यर्थे अव्ययम् । 'जगद्' इति शेषः । तत्तस्मात् प्रकृताद् हरेः जगद् "एजति" बिभेति — तत् ब्रह्म "नैजति" न बिभेति, स्वतन्त्रत्वाद्, इति भावः । तदु तदेव ब्रह्म दूरे । 'तदु तदेवान्तिके समीपे च, सर्वगतत्वाद्', इति भावः । तत् ब्रह्म अस्य प्रमितस्य सर्वस्यान्तः । 'तदु तदेव सर्वस्य बाह्यतः, बहिरपि सर्वव्यापित्वाद्', इति भावः ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

"तद्दूर" इत्यादौ हरेः सर्वभूताश्रयतया सर्वभूतगतत्वमुक्तम् । तज्ज्ञानस्य फलमाह — "यस्तु" इति । "सर्वाणि भूतानि" चिदचिदात्मकं सर्वं जगत् । "आत्मन्येव" परमात्माश्रयत्वेन एव अस्तीति "यस्तु" "अनु" निस्सन्देहं "पश्यति" जानाति । यद्वा आश्रितत्वक्रमानुरोधेनेति "अनु"शब्दार्थः । "सर्वभूतेषु च आत्मानं" — 'सर्वभूतेषु नियन्तृतया स्थितं हरिं यो अनुपश्यति', इत्यन्वयः । ततः परमात्मस्वरूपज्ञानित्वात् हेतोर् "न विजुगुप्सते" । 'स्वात्मानं गोप्तुं नेच्छति, भयाभावाद्', इति भावः ॥ ६ ॥

एतमेवार्थं विवृणोति —

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

'यस्मिन्नात्मनि सर्वाणि भूतानि तिष्ठन्ति" इति शेषः । स "आत्मैव" तत्र सर्वभूतेषु "अभूत्", 'अनादितो वर्तत' इत्यर्थः । 'एवम्' इति शेषः । एवं "विजानतः" सर्वाधारतया सर्वेषु

भूतेषु आत्मानं विशेषेण जानतः सर्वत्र स्थितस्य हरेः "एकत्वं" च "अनुपश्यतः" जानतः, को मोहः कः शोकः? — न कोऽपि, इत्यर्थः ॥ ७ ॥

'भगवज्ज्ञानमात्रेण कुतो मोहाद्यभाव?' इत्यत आह —

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

'स ज्ञानी पर्यगात् प्राप्तोऽभूत् ब्रह्मा' इति शेषः । 'तावता कथं शोकाद्यभाव?' इत्यतः तद्विशिनष्टि, "शुक्रम्" इत्यादिना । 'शुचं शोकं रहति त्यजति', इति शुक्रं शोकरहितम् । "अकायं" लिङ्गदेहरहितम् । "अव्रणं", "व्रण सञ्चूर्णन" इत्यतः स्तोको व्रणः । कालेन अस्तोकत्वादव्रणं नित्यम् । गुणैरस्तोकत्वाद् "अव्रणम्" — पूर्णमित्यर्थः । "अस्नाविरम्" स्नावोपलक्षितसप्तधातुमयस्थूलदेहरहितम् । "शुद्धं" पावित्र्यहेतुं, शुद्धत्वादेव "अपापविद्धम्" । तत एव हेतोः पापमूलस्थूलसूक्ष्मशरीरहीनम् । तत एव 'देहनिमित्तशोकादिशून्यम्', इति "शुक्रम्" इत्युच्यते । एवम्भूतं हरिं "पर्यगाद्" यतोऽतः कारणाच्छोकाद्यभावः । 'एवम्भूतहरिसारूप्यलक्षणां तद्गतिं गतस्य शोकाद्यभावो युक्त', इति भावः ।

'ननु एवमशरीरश्चेत्, जगत्स्रष्टा नेति प्राप्तम् । लोके सदेहस्यैव स्रष्टृतादर्शनाद्' इत्याशङ्कां निराह — "कविर्" इति । कविः सर्वज्ञः । "मनीषी" प्रकृत्यादिसर्वमनसां ईशितृत्वाद् मनीषी । एतेन 'ज्ञानाविनाभूतदेहवान्' इति लभ्यते । स च अप्राकृत एव, इति प्रागुक्तः । तन्निमित्तशोकाद्यभावो युक्तः । प्राकृतस्यैव तद्धेतुत्वात् । 'परिभवति सर्वं वशीकरोति' इति "परिभूः" । 'सर्वतो वर' इत्यर्थः । 'स्वयमेव परमनपेक्ष्य भवति' इति "स्वयम्भूः" । सदाऽनन्याश्रयः "शाश्वतीभ्यः समाभ्य" इति पञ्चमी सप्तम्यर्थे । अनाद्यनन्तसंवत्सरेषु "याथातथ्यतो" याथार्थ्येन वर्तमानानर्थान् "व्यदधान्" निर्मिमे । याथातथ्यत इत्युक्त्या 'ब्रह्मविवर्तत्वादर्थानां न तत्सृष्टौ देहाद्यपेक्षा' इति चोद्यं निरस्तम् । "शाश्वतीभ्यः समाभ्य" इत्युक्त्या 'सदा देहहीनस्यापि सृष्टिसमये देहोपादानेनास्तु सृष्टिः' इति चोद्यं निरस्तं ध्येयम् । 'सृष्ट्यादिप्रवाहस्य अनाद्यनन्तकालीनत्वाद्' इति ॥ ८ ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ ९ ॥

"विजानतो" "ऽनुपश्यत" इत्यत्र 'यथावत्परमात्मज्ञानं

मुक्तिहेतुः' इत्युक्तम् । 'तज्ज्ञानं मिथ्याज्ञाननिन्दासमुच्चितमेव मुक्तिहेतुः, न केवलम्', इत्याह — "अन्धं तम" इत्यादिमन्त्रत्रयेण । तत्र तावद्यथावज्ज्ञानस्येव अन्यथाज्ञाननिन्दनस्य आवश्यकत्वोपपादनाय अन्यथाज्ञानस्य प्रागुक्तमसुर्यलोकसाधनत्वमनूद्य अन्यथाज्ञानानिन्दनस्य ततोऽधिकानर्थहेतुत्वमाद्येन मन्त्रेणोच्यते । अत्र "अविद्या"शब्देन विद्याविरोधिमिथ्याज्ञानवाचिना तद्विषयो अन्यथाप्रकारो ग्राह्यः । तथा च अविद्यां यथावदाकारादन्यथाकारं "उपासते" ध्यायन्ति ये, ते "अन्धं तमः प्रविशन्ति" — इत्युक्तानुवादः । "ये" "विद्यायां" "उ" तत्त्वज्ञान एव "रताः" मिथ्याज्ञाननिन्दका इत्येवकारार्थः । ते ततो मिथ्याज्ञानिप्राप्य तमसो "भूय" अधिकं तमः । "इव"शब्दस्य "व्यक्तम्" इत्यर्थः । 'असंशयम्' इति यावत् । "प्रविशन्ति" इत्यन्वयः ॥ ९ ॥

'न केवलं विपक्षे अनर्थप्राप्तेरेव सम्यग्ज्ञानासम्यग्ज्ञाननिन्दनयोः कार्यत्वं, किन्तु मोक्षफलस्यांशतः उभयसाध्यत्वादपि द्वयोः कार्यत्वम्', इत्याहुः —

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

"विद्यया" तत्त्वज्ञानेन "अन्यदेव" मोक्षैकदेशरूपं फलं प्राप्यमाहुः वृद्धाः । "अविद्यया" — 'अन्यथाज्ञाननिन्दया च', इति यावत् । "अन्यदेव" मोक्षैकदेशलक्षणं फलं प्राप्यमाहुः वृद्धाः । "इति" इत्येवं वृद्धवचनसम्मतियुक्तं वचनं धीराणां धीमतां (श्रीमतां) सकाशात् "शुश्रुम" श्रुतवन्तः स्म । "ये" "धीरा" "नो"ऽस्माकं मोक्षसाधनं "विचचक्षिरे" व्याचचक्षिरे । 'अतो द्वयमपि आवश्यकम्' इति भावः ॥ १० ॥

एतन्मन्त्रार्थमेव व्यक्तमाह —

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

"विद्याम्" विष्णुयाथात्म्यज्ञानम् । "अविद्याम्" मिथ्याज्ञाननिन्दनम् । "च"शब्दावितरेतरयोगे । 'सह एकपुरुषार्थहेतुत्वेन तदुभयं यो वेद, स' इति शेषः । "अविद्यया" अन्यथाज्ञाननिन्दया "मृत्युं" दुःखाज्ञानाद्यनिष्टं "तीर्त्वा", "विद्यया" विष्णुयाथात्म्यज्ञानेन "अमृतं" आनन्दानुभवलक्षणं मोक्षैकदेशं, "अश्नुते" प्राप्नोति । 'अनिष्टनिवृत्तेर्मिथ्याज्ञाननिन्दनसामर्थ्यलभ्यत्वात् आनन्दानुभवस्य

च तत्त्वज्ञानसामर्थ्यलभ्यत्वात् दलद्वययुक्तमोक्षप्राप्तये, द्वयमपि आवश्यकमेव',
इत्युक्तं भवति ॥ ११ ॥

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२ ॥

'मिथ्याज्ञानमनर्थहेतुः तत्त्वज्ञानमेव मुक्तिहेतुः', इति प्रागुक्तस्य विवरणं "अन्धं तमः" इत्युत्तरमन्त्रत्रयेण क्रियते । तत्राद्यस्य अयमर्थः । "असम्भूतिं" जगत्सृष्टेरकर्तारं 'सृष्टिकर्ता न' इत्युपासते, इत्यर्थः । "सम्भूत्याम्" — "उ"शब्द एवार्थो अनेनान्वेति । "सम्भूत्याम्" "उ" सृष्टिकर्तृत्व एव रताः । 'भगवान् सृष्टिकर्तैव, न संहारकर्ता', इत्युपासत इत्यर्थः । प्राग्वदेव अवशिष्टस्यार्थो ध्येयः (ज्ञेयः) ॥ १२ ॥

'न केवलं विपक्षे अनर्थसत्त्वादेव सृष्टिसंहारयोः कर्तृत्वं हरेर्ज्ञेयं, किन्तु दलद्वययुक्तमोक्षोपयोगित्वादपि', इत्याह —

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

"सम्भवात्" हरेः सृष्टिकर्तृत्वज्ञानात्, "असम्भवात्" संहारकर्तृत्वज्ञानत्, इत्यर्थः । शिष्टं प्राग्वत् ज्ञेयम् ॥ १३ ॥

एतन्मन्त्रार्थमेव व्यक्तमाह —

सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १४ ॥ १ ॥

"सम्भूतिम्" सृष्टिकर्तृत्वं, "विनाशं" जगत्संहारकर्तृत्वं, शिष्टं प्राग्वत् । 'सृष्टि उपलक्षितानन्तगुणात्मकत्वज्ञानादानन्दानुभवः विनाशकर्तृत्वज्ञानात् अखिलक्लेशनिवृत्तिरिति उभयरूपमोक्षाय उभयज्ञानमावश्यकम्', इति भावः ॥ १४ ॥ १ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

एवमाद्यमन्त्रद्वयेनोक्तदिशा प्राप्ताधिकारं शिष्यं प्रति "अनेजदेकम्" इत्यादिना भगवत्स्वरूपं निरूप्य, "यस्तु सर्वाणि" इत्यादिसार्धमन्त्रद्वयेन

तत्साक्षात्कारो मोक्षहेतुरित्युक्तम् । 'स च साक्षात्कारो न श्रवणादिमात्रेण, किन्तु ईश्वरप्रसादेन भवतीत्यतो अनुष्ठितश्रवणादिकेनापि तत्साक्षात्कारार्थं भगवत्प्रार्थनं कार्यम्', इति भावेन प्रार्थनाप्रकारमाह — "हिरण्मयेन" इत्यादिना "स्मर" इत्यन्तेन ग्रन्थेन ।

हिरण्मयमिव "हिरण्मयम्" ज्योतिर्मयम् । 'पिबति रसान् त्रायते जगद्' इति च "पात्रम्" । तेन "हिरण्मयेन पात्रेण" सूर्यमण्डलेन "सत्यस्य" सद्गुणपूर्णस्य सूर्यमण्डलस्थस्य तव "मुखम्" । उपलक्षणं चैतत् । वपुः सर्वदा "अपिहितं" अस्ति । हे "पूषन्" पूर्ण, "पुष पुष्टौ" इति धातोः । तद्वपुः "त्वं" "सत्यधर्माय" 'सत्यं भगवन्तं हृदये धारयति' इति व्युत्पत्त्या त्वद्ध्यानादिमते भक्ताय मह्यं "दृष्टये" मम त्वद्दर्शनार्थं "अपावृणु", अपगतावरणं कुरु ॥ १५ ॥

> पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् ।
> समूह तेजः यत् ते रूपं कल्याणतमं तत् ते पश्यामि ॥ १६ ॥

हे "पूषन्", पूर्ण, "एकर्षे" सर्वविषयकत्वादिना प्रधानज्ञानवत्त्वहेतुना "एकर्षि"शब्दवाच्यः सन् एकर्ष्याख्यमुनिस्थ । "यम" सर्वनियामकतया "यम"शब्दवाच्यः सन् यमान्तर्गत । सूरिभिः प्राप्यत्वहेतुना, "सूर्य"शब्दवाच्यः सन् सूर्यान्तर्गत । "प्राजापत्य" प्रजापतेः हिरण्यगर्भस्य विशेषेण प्राप्यतया "प्राजापत्य"शब्दवाच्य । "रश्मीन्" मदीयं स्वरूपज्ञानं "व्यूह" विस्तारय । "तेजो" बाह्यज्ञानं च "समूह" विस्तारय — इत्यर्थः । "तेज" इति स्वरूपज्ञानम् । "रश्मीन्" इति बाह्यज्ञानं वा ।

तथा च "यत्ते रूपं कल्याणतमं" तद्रूपं ते प्रसादादहं "पश्यामि", इति आदित्यरश्म्यादीनां अपगमनादिना तदन्तर्गतप्रतीत्यसम्भवात् आदित्यरश्म्यादिविषयं व्याख्यानमयुक्तम् ॥ १६ ॥

'सर्वजीवोत्तममुख्यवायुरूपप्रतीकस्थित्यादिज्ञानं आवश्यकम्', इति भावेन तत् स्थित्यादिकमाह —

> योऽसावसौ पुरुषः सोऽहमस्मि ॥ १७ ॥

"योऽसौ" — 'प्रसिद्धोऽसौ मुख्यप्राणे स्थित' इति शेषः । 'सोऽहेयत्वात् "अहम्"इत्युक्तः सदाऽस्तित्वेन मेयत्वहेतुना "अस्मि"इति तिङ्प्रतिरूपकाव्ययपदवाच्यः तं पश्यामि' — इत्यर्थः ।

यद्वा "असावसौ" इति द्वयमपि प्रथमान्तमेव । वीप्सायां द्विरुक्तिः । पूर्वं पूषादिशब्दैरुपलक्षणतया प्राणाद्यनेकप्रतीकस्थत्वं विष्णोरुक्तम् । तत्र भेदशङ्कायां "योऽसौ" इति वाक्यमुच्यते । "योऽसावसौ पुरुषः" प्राणाद्यनेक(पूषाद्यनेक)प्रतीकेषु स्थितः "सोऽहमस्मि" — मदन्तर्यामितया अस्ति, इत्यर्थः । 'सर्वप्रतीकेषु मयि च स्थित एक एव', इति फलितोऽर्थः ।

"अहं"पदस्य प्रत्यगात्मं जीवान्तर्यामिणि मुख्यतया तत्समभिव्याहाराद् "अस्मि" इति उत्तमपुरुषप्रयोगोऽपि साधुरेव, इति ज्ञेयम् ॥ १७॥

'ननु परमेश्वरस्य यत्कल्याणरूपत्वमुक्तं यच्च "सोऽहमस्मि" इति जीवान्तर्गतस्य नित्यास्तित्वमुक्तं, तन्न युक्तम् । देहनाशस्य प्रत्यक्षादिसिद्धतया, तदन्तर्गतस्य जीवस्येव मरणाद्यवश्यम्भावाद्', इत्याशङ्कां कैमुत्येन निराह —

वायुरनिलममृतमथेदं भस्मांतꣳ शरीरम् ॥ १८॥

यद्यपि "इदं" "शरीरं" "भस्मान्तं", तथापि तदन्तर्गतस्य हरेः न मरणादिदोषप्रसक्तिः । कुतः? "अनिलम्" — 'अः ब्रह्मैव निलं निलयनं आश्रयो यस्य सोऽनिलः' । 'परमेश्वराश्रितो वायुरपि यदाऽमृतः नित्यः, अथ तदा परमेश्वरोऽमृत इति किमु वक्तव्यम्?' — इत्यर्थः । "अनिल""अमृत"पदयोः लिङ्गव्यत्ययो ज्ञेयः । वायोरमृतत्वं नित्यज्ञानत्वेन ज्ञेयम्, "अतिरोहितविज्ञानाद् वायुरपि अमृतः स्मृतः" इत्युक्तेः । "एतेन मातरिश्वा व्याख्यातः" (ब्र.सू. २.३.८) इत्यत्र भाष्यादौ तथा निर्णयाच्च — इति ॥ १८॥

अथ प्रणवप्रतीकं प्रार्थयते —

ॐ क्रतो स्मर कृतꣳ स्मर ।<br>
ॐ क्रतो स्मर कृतꣳ स्मर ॥ १९॥

ओतत्वादिगुणयुक्ततया "ॐ"इत्युच्यमान "क्रतो" ज्ञानरूपहरे । 'माम्' इति शेषः । "स्मर" अनुगृहाण । "कृतं" मदीयं ध्यानादिकं कर्म "स्मर" । 'ध्यानादिना मया कृतेन मयि अनुग्रहोन्मुखो भव', इत्यर्थः । नित्यज्ञप्तिस्वरूपस्य संस्कारजन्यस्मरणायोगात् । अभ्यासः तात्पर्यार्थः ॥ १९॥

'कृतश्रवणादिना पुरुषेण साक्षात्कारार्थं हरेः प्रार्थनं कार्यम्', इत्यतः तत्प्रकारं "हिरण्मयेन" इत्यादिनोक्त्वा अधुना 'प्राप्तसाक्षात्कारेणापि

पुंसा मोक्षार्थं भगवदुपासनं कार्यम्' इति भावेन अग्निप्रतीकस्थ भगवत्प्रार्थनाप्रकारमाह —

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ २०॥ २॥

'अङ्गं देहं गुणभूतं जगद्वा नयति प्रेरयति' इति व्युत्पत्त्या "अग्नि"पदमुख्यार्थः सन् अग्नौ विद्यमानहरे । "अस्मान्" "सुपथा" पुनरावृत्तिहीनार्चिरादिमार्गेण "राये" मोक्षाख्यवित्ताय "नय" ।

कुतः? हे देव अस्मदनुष्ठितानि विश्वानि सम्पूर्णानि मोक्षाय पर्याप्तानि' इति यावत् । "वयुनानि" ज्ञानानि भवान् "विद्वान्" वेद । 'प्रारब्धकर्मयुक्तस्य कथं मोक्ष?', इत्यत उक्तं, "युयोधि" इति । "अस्मान्" इत्यत्रापि अनुषज्यते । "अस्मान्" "जुहुराणं" अल्पान् कुर्वत्संसारे परिवर्तयदिति यावत् । 'एनः पापं अनिष्टं कर्म' इति यावत् । "अस्मत्" अस्मत्तः "युयोधि" वियोजय । "युयु वियोगे" इति धातोर्लुग्विकरणम् । वयं तु "ते" तुभ्यं "भूयिष्ठां" भक्तिज्ञानोपेतां "नम उक्तिं" नम इत्युक्तिं "विधेम" कुर्मः । 'न तु तत् प्रतिकर्तुं शक्नुम' — इति ॥ २०॥ २॥

समस्तगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

ईषावास्योपनिषदो भाष्याद्युक्तार्थसङ्ग्रहः ।
राघवेन्द्रेण यतिना कृतोऽयं शिष्ययाञ्चया ॥

इति श्रीराघवेन्द्रयतिविरचितः श्रीमदीशावास्योपनिषत्खण्डार्थः समाप्तः

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु॥

# परिशिष्टम्

## ईशावास्योपनिषदि श्रीमच्छङ्करभगवत्पादाचार्यविरचितं भाष्यम्

“ईशावास्यम्” इत्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्याऽऽत्मनो याथात्म्यप्रकाशकत्वात् । याथात्म्यं चाऽऽत्मनः शुद्धत्व, अपापविद्धत्व, एकत्व, नित्यत्व, अशरीरत्व, सर्वगतत्वादि वक्ष्यमाणम् । तच्च कर्मणा युक्त विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः । न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्? सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् । गीतानां मोक्षधर्माणां चैवम्परत्वात् । तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि । यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवान् इत्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति । तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनाऽऽत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानं उत्पादयन्ति इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रान् सङ्क्षेपतो व्याख्यास्यामः ।

“ईशावास्यम्” इत्यादि — ईशा ईष्ट इतीट् तेनेशा । ईशिता परमेश्वरः परमात्मा सर्वस्य । स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया, तेन स्वेन रूपेणाऽऽत्मनेशा वास्यमाच्छादनीयम् । किम्? “इदं सर्वं” यत्किञ्चिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनाऽऽत्मनेशेन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना । यथा चन्दनागर्वादेरुदकादि-सम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाऽऽच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं “जगत्यां” पृथिव्यां जगत्यां इत्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया व्यक्तं स्यात्? एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो, न कर्मसु । “तेन त्यक्तेन”, त्यागेन इत्यर्थः । न हि त्यक्तो मृतः पुत्रो वा भृत्यो वाऽऽत्मसम्बन्धिताया अभावादात्मानं पालयति, अतस्त्यागेनेत्ययमेव वेदार्थः । “भुञ्जीथाः” पालयेथाः । एवं त्यक्तैषणस्त्वं “मा गृधः”, गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम् ।

"कस्यस्विद्धनं" कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः ।
स्वदित्यनर्थको निपातः ।

अथवा "मा गृधः" । कस्मात्? "कस्यस्विद्धनम्" इति
आक्षेपार्थो, न कस्यचिद्धनमस्ति, यद्गृध्येत? 'आत्मैवेदं सर्वम्'
इतीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो
मिथ्याविषयां गृधिं मा कार्षीः — इत्यर्थः ॥१॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतयाऽऽत्मा
रक्षितव्य इत्येष वेदार्थः । अथेतरस्यानात्मज्ञतयाऽऽत्मग्रहणायाशक्तस्य
इदमुपदिशति मन्त्रः — "कुर्वन्नेव" इति । "कुर्वन्नेवेह"
निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि "जिजीविषेज्" जीवितुमिच्छेत्
शतसङ्ख्याकाः "समाः" संवत्सरान् । तावद्धि पुरुषस्य
परमायुर्निरूपितम् । तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं
वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते । एवमेवं प्रकारेण "त्वयि"
जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो
वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न
"लिप्यते" कर्मणा न लिप्स्यस, इत्यर्थः । अतः शास्त्रविहितानि
कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् । 'कथं पुनरिदमवगम्यते
पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य
कर्मनिष्ठा', इति उच्यते । ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं
यथोक्तं न स्मरसि किम्? इहाप्युक्तं, 'यो हि जिजीविषेत्स कर्म कुर्वन् । ईशा
वास्यमिदं सर्वं, तेन त्यक्तेन भुञ्जीथा, मा गृधः कस्यस्विद्धनम्, इति च ।
"न जीविते मरणे वा गृधिं कुर्वीतारण्यमियाद्" इति च पदम् । ततो न
पुनरियादिति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति — "इमौ द्वावेव
पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण"[11] ।

निवृत्तिमार्गेणैषणात्रयस्य त्यागः । तयोः संन्यासपथ एवातिरेचयति ।
"न्यास एवात्यरेचयद्" इति च तैत्तिरीयके ।

"द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः ।
प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च विभावितः" ॥

— इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता ।
विभागं चानयोर्दर्शयिष्यामः ॥२॥

[11] नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति — आनन्दगिरि टीका

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते — "असुर्याः", परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम । नामशब्दोऽनर्थको निपातः । ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि । "अन्धेन" अदर्शनात्मकेन, अज्ञानेन "तमसाऽऽवृता" आच्छादितास्तान्स्थावरान्तन् "प्रेत्य" त्यक्त्वेमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम् । "ये के चाऽऽत्महनः" — आत्मानं घ्नन्ति, इति आत्महनः । के ते जनाः? येऽविद्वांसः । कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्याऽऽत्मनस्तिरस्करणात् । विद्यमानस्याऽऽत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना "आत्महन" उच्यन्ते । तेन ह्यात्महननदोषेण संसरन्ति ते ॥ ३॥

यस्याऽऽत्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नाऽऽत्महनः । तत्कीदृशमात्मतत्त्वमित्युच्यते, "अनेजद्" इति । "अनेजद्", न एजत् । "एजृ कम्पने" । 'कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपम्', इत्यर्थः । तच्चैकं सर्वभूतेषु । "मनसः" सङ्कल्पादिलक्षणाद् "जवीयो" जववत्तरम् । 'कथं विरुद्धमुच्यते, ध्रुवं निश्चलमिदं मनसो जवीय, इति च?' — नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः । तत्र निरुपाधिकेन स्वेन रूपेणोच्यते, "अनेजदेकम्" इति । मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्य उपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम् । 'तस्मिन्, मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवाऽऽत्मचैतन्य अवभासो गृह्यते, अतो मनसो जवीय' इत्याह — "नैनद्देवा" । द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाऽऽप्नुवन्न प्राप्तवन्तः । तेभ्यो मनो जवीयो, मनोव्यापारव्यवहितत्वात् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति । यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतम् । व्योमवद् व्यापित्वात् । 'सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत', इत्येतदाह — "तद्धावतो" । द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति — "तिष्ठद्" इति । स्वयमविक्रियमेव सदित्यर्थः । "तस्मिन्" आत्मतत्त्वे सति नित्यचैतन्यस्वभावे, "मातरिश्वा" — 'मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा' वायुः सर्वप्राणभृत्क्रियात्मको

यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ, स मातरिश्वा । "अपः" कर्माणि प्राणिनां चेष्टालक्षणानि । अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि "दधाति" विभजतीत्यर्थः । धारयतीति वा । "भीषाऽस्माद्वातः पवते" (तै.उ. २.८) इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४॥

न मन्त्राणां जामिताऽस्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह "तदेजति" इति । तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च "नैजति" स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः । किञ्च "तद्दूरे" वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव, तत् "उ" अन्तिक इति च्छेदः । "तद्वन्तिके" समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च, तदन्तरभ्यन्तरे "अस्य सर्वस्य", "य आत्मा सर्वान्तर" इति श्रुतेः । "अस्य सर्वस्य" जगतो नामरूपक्रियात्मकस्य "तदु" अपि "सर्वस्य" अस्य "बाह्यतः" व्यापकत्वाद्, आकाशवन्निरतिशयसूक्ष्मत्वादन्तः । "प्रज्ञानघन एव" इति च शासनान्निरन्तरं च ॥ ५॥

"यस्तु" स्थावरान्तानि "आत्मन्येवानुपश्यति" 'आत्मव्यतिरिक्तानि न पश्यति' इत्यर्थः । "सर्वभूतेषु" च तेष्वेव "चाऽऽत्मानं" तेषामपि भूतानां स्वमात्मानमात्मत्वेन, यथाऽस्य देहस्य कार्यकारणसङ्घातस्याऽऽत्माहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता "केवलो निर्गुणः" (श्वे.उ. ६.११) अनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवाऽऽत्मेति सर्वभूतेषु चाऽऽत्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न "विजुगुप्सते" विजुगुप्सां घृणां न करोति । प्राप्तस्यैवानुवादोऽयम् । सर्वा हि घृणाऽऽत्मनोऽन्यद् दुष्टं पश्यतो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव "ततो न विजुगुप्सत" इति ॥ ६॥

इममेवार्थमन्योऽपि मन्त्र आह — "यस्मिन्सर्वाणि भूतानि" । यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि "सर्वाणि" परमार्थात्मदर्शनाद् "आत्मैवाभूद्" आत्मैव संवृत्तः परमार्थवस्तु "विजानतस्तत्र" तस्मिन्काले तत्राऽऽत्मनि वा "को मोहः कः शोकः"? शोकश्च मोहश्च कामकर्मबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः । "को मोहः कः शोक" इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासम्भवप्रदर्शनात्, सकारणस्य संसरस्य अत्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७॥

'योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण?' इत्याह

अयं मन्त्रः — "स पर्यगात्" । स यथोक्त आत्मा "पर्यगात्" परि समन्तादगाद्गतवानाकाशवद् व्यापीत्यर्थः । शुक्रं शुद्धं ज्योतिष्मद् दीप्तिमानित्यर्थः । "अकायम्", 'अशरीरो लिङ्गशरीरवर्जित' इत्यर्थः । "अव्रणम्" अक्षतम् । "अस्नाविरम्" स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम् । अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः । "शुद्धम्" निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः । "अपापविद्धम्" धर्माधर्मादिपापवर्जितम् । "शुक्रम्" इत्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि "स पर्यगाद्" इत्युपक्रम्य "कविर्मनीषी" इत्यादिना पुंलिङ्गत्वेन उपसंहारात् । "कविः" क्रान्तदर्शी, सर्वदृक् । "नान्योऽतोऽस्ति द्रष्टा" इत्यादिश्रुतेः । "मनीषी" मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः । "परिभूः" सर्वेषां पर्युपरि भवतीति परिभूः । "स्वयम्भूः" स्वयमेव भवतीति । येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः । स नित्यमुक्त ईश्वरो "याथातथ्यतः" सर्वज्ञत्वाद्यथातथा भावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतो अर्थान्कर्तव्यपदार्थान्, "व्यदधाद्" विहितवान्, यथानुरूपं व्यभजद्, इत्यर्थः । "शाश्वतीभ्यो" नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यः इत्यर्थः ॥ ८॥

अत्राऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः । "ईशावास्यमिदं सर्वम्", "मा गृधः कस्यस्विद् धनम्" इति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसम्भवे, "कुर्वन्नेवेह कर्माणि जिजीविषेद्" इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः । अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः, "सोऽकामयत जाया मे स्याद्" (बृ.उ. १.४.१७) इत्यादिना अज्ञस्य कामिनः कर्माणीति "मन एवास्याऽत्मा वाग्जाया" (बृ.उ. १.४.१७) इत्यादिवचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते । तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनाऽऽत्मस्वरूपावस्थानम् । जायाद्येषणात्रय संन्यासेन चाऽऽत्मविदां कर्मनिष्ठाप्रातिकूल्येन आत्मस्वरूपनिष्ठैव दर्शिता — "किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक" (बृ.उ. ४.४.२२) इत्यादिना । ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्यो "असुर्या नाम त" इत्यादिनाऽविद्वन्निन्दाद्वारेणाऽऽत्मनो याथात्म्यं "स पर्यगाद्" इत्येतदन्तैर्मन्त्रैरुपदिष्टम् । 'ते ह्यत्राधिकृता न कामिन', इति । तथा च श्वेताश्वतराणां मन्त्रोपनिषदि "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्" (श्वे.उ. ६.२१) इत्यादि विभज्योक्तम् । ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते — "अन्धं तम" इत्यादि । 'कथं पुनरेवमवगम्यते न तु सर्वेषाम्?' इति

उच्यते, अकामिनः साध्यसाधनभेदोपमर्देन "यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः, तत्र को मोहः कः शोक एकत्वमनुपश्यत" इति यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति । इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते । तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः, शास्त्रतो वा, तदिहोच्यते । यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं, न परमात्मज्ञानम् । "विद्यया देवलोक" इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात् । "विद्यया तदारोहन्ति", "विद्यया देवलोक", "न तत्र दक्षिणा यान्ति", "कर्मणा पितृलोक" इति । नहि शास्त्रविहितं किञ्चिद् अकर्तव्यतामियात् । तत्रान्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति । "के" येऽविद्यां विद्याया अन्याऽविद्या तां कर्मेत्यर्थः । कर्मणो विद्याविरोधित्वात् । तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपास्ते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततस्तस्मादन्धात्मकात्तमसो "भूय इव" बहुतरमेव "ते" तमः प्रविशन्ति । "के" कर्म हित्वा "ये" "उ" ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः ॥ ९॥

तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह, अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्यादित्यर्थः । "अन्यदेव" इत्यादि । अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति, "विद्यया देवलोको", "विद्यया तदारोहन्ति" इति श्रुतेः । "अन्यदाहुरविद्यया" कर्मणा क्रियते, "कर्मणा पितृलोक" इति श्रुतेः । इत्येवं "शुश्रुम" श्रुतवन्तो वयं "धीराणां" धीमतां वचनम् । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च "विचचक्षिरे" व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत, इत्यर्थः ॥ १०॥

यत एवमतो "विद्यां चाविद्यां च" देवताज्ञानं कर्म चेत्यर्थः, "यस्तद्" एतद् "उभयं सह" एकेन पुरुषेणानुष्ठेयं "वेद" तस्यैव समुच्चयकारिण एवैकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते — "अविद्यया" कर्मणाऽग्निहोत्रादिना "मृत्युम्" स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं "तीर्त्वा" अतिक्रम्य "विद्यया" देवताज्ञानेन "अमृतम्" देवतात्मभावं "अश्नुते" प्राप्नोति । तद्धि अमृतमुच्यते, यद्देवतात्मगमनम् ॥ ११॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते — "अन्धं तमः प्रविशन्ति येऽसम्भूतिम्" सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिस्तस्या अन्या "असम्भूतिः" प्रकृतिः

कारणमविद्याऽव्याकृताख्या तामसम्भूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकां "उपासते" ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति । "ततः" तस्मादपि "भूयो" बहुतरमिव "तमः" प्रविशन्ति "य उ सम्भूत्याम्" कार्यब्रह्मणि हिरण्यगर्भाख्ये "रताः" ॥१२॥

अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह — "अन्यदेव" इति । अन्यदेव पृथगेवाऽऽहुः फलं "सम्भवात्" सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त, इत्यर्थः । तथा च, "अन्यदाहुरसम्भवाद्" असम्भूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तं, "अन्धं तमः प्रविशन्ति" इति प्रकृतिलय इति च पौराणिकैरुच्यते । इत्येवं "शुश्रुम धीराणां" वचनं "ये नस्तद्विचचक्षिरे" व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥१३॥

यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्च, इत्याह — "सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह" । "विनाशेन" विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणाऽभेदेनोच्यते "विनाश" इति । तेन तदुपासनेन अनैश्वर्यमधर्मकामादिदोषजातं च "मृत्युं तीर्त्वा" हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम् । तेनानैश्वर्यादिमृत्युमतीत्य "असम्भूत्या" अव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणमश्नुते । "सम्भूतिं च विनाशं च" इत्यत्र अवर्णलोपेन निर्देशो द्रष्टव्यः, प्रकृतिलयफलश्रुत्यनुरोधात् ॥१४॥

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तं "आत्मैवाभूद्विजानत" इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्ति-निवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने, प्रवर्ग्यान्तं ब्राह्मणमप्युक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तं, तत्र निषेकादिश्मशानान्तं कर्म कुर्वज्जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया, तदुक्तं "विद्यां चाविद्यां च यस्तद्वेदोभयं सह, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत" इति तत्र केन मार्गेणामृतत्वमश्नुत, इत्युच्यते — "तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष" (बृ.उ. ५.५.२) एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सति आत्मानमात्मनः प्राप्तिद्वारं याचते, "हिरण्मयेन पात्रेण" । हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् । तेन पात्रेणेवापिधानभूतेन

"सत्यस्य" एवाऽदित्यमण्डलस्थस्य ब्रह्मणो "अपिहितम्" आच्छादितं "मुखम्" द्वारं "तत्त्वम्" हे "पूषन्नपावृणु" अपसारय "सत्यधर्माय" तव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यम् । अथवा, यथाभूतस्य धर्मस्यानुष्ठात्रे "दृष्टये" तव सत्यात्मन उपलब्धये ॥ १५ ॥

"पूषन्" इति — हे पूषन्, जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छतीत्येकर्षिः । हे "एकर्षे" तथा सर्वस्य संयमनाद्यमः । हे "यम", तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्सूर्यः । हे "सूर्य" प्रजापतेरपत्यं प्राजापत्यः । हे "प्राजापत्य" "व्यूह" विगमय रश्मीन्स्वान् । "समूह" एकी कुरु, उपसंहार ते "तेजः" तापकं ज्योतिः । "यत्ते" तव "रूपं कल्याणतमम्" अत्यन्तशोभनं, "तत्ते" तवाऽऽत्मनः प्रसादात् "पश्यामि" ॥ १६ ॥

किञ्चाहं न तु त्वां भृत्यवद्याचे, "योऽसावादित्य" मण्डलस्थो व्याहृत्यवयवः "पुरुषः" पुरुषकारत्वात् पूर्णं वाऽनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरि शयनाद्वा पुरुषः "सोऽहमस्मि" भवामि ॥ १७ ॥

"वायुः" इति अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकं, "अनिलम्", "अमृतम्", 'सूत्रात्मानं प्रतिपद्यताम्' इति वाक्यशेषः । लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम् । मार्गयाचनसामर्थ्यात् । अथेदं शरीरमग्नौ हुतं "भस्मान्तम्" भूयात् ॥ १८ ॥

"ॐ"इति यथोपासनं ॐप्रतीकात्मकत्वात्सत्यात्मकमग्न्यात्मकब्रह्मभेदेनोच्यते । हे "क्रतो" सङ्कल्पात्मक, "स्मर" यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मरैतावन्तं कालं भावितं "कृतम्" अग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । "क्रतो स्मर कृतं स्मर" इति पुनर्वचनमादरार्थम् ॥ १९ ॥

पुनरन्येन मन्त्रेण मार्गं याचते — "अग्ने नय" इति । हे "अग्ने" "नय" गमय "सुपथा" शोभनेन मार्गेण । "सुपथा" इति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्वण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा "नय" । "राये" धनाय कर्मफलभोगायेत्यर्थः । "अस्मान्" यथोक्त धर्मफलविशिष्टान्, "विश्वानि" सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानि वा "विद्वान्" जानन् । किं च "युयोधि वियोजय" विनाशयास्मदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम् ।

ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम, इत्यर्थः । किन्तु वयमिदानीं ते न शक्नुम परिचर्यां कर्तुं "भूयिष्ठाम्" बहुतरां "ते" "नमउक्तिम्" नमस्कारवचनं परिचरेम, इत्यर्थः ॥ २०॥

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते", "विनाशेन मृत्युं तीर्त्वाऽसम्भूत्याऽमृतमश्नुत" इति श्रुत्वा केचित् संशयं कुर्वन्ति । अतस्तन्निराकरणार्थं सङ्क्षेपतो विचारणां करिष्यामः । तत्र तावत्किं निमित्तः संशय? इत्युच्यते । "विद्या"शब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वं च ।

ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं, तथा तद्विरोधाविरोधावपि । यथा च "न हिंस्यात्सर्वा भूतानि" इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते — "अध्वरे पशुं हिंस्याद्" इति । एवं विद्याविद्ययोरपि स्याद्, विद्याकर्मणोश्च समुच्चयः ।

न — "दूरमेते विपरीते विषूची अविद्या या च विद्या" (क.उ. १.२.४) इति श्रुतेः हेतुस्वरूपफलविरोधात् । "विद्यां चाविद्यां च" इति वचनादविरोध, इति चेन्न, विद्याऽविद्याविरोधाविरोधयोर्विकल्पासम्भवात् । समुच्चयविधानादविरोध एवेति चेन्न, समसम्भवानुपपत्तेः । क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न, विद्योत्पत्तावविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः । न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेव आश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा । "यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः, तत्र को मोहः कः शोक एकत्वमनुपश्यत" इति शोकमोहाद्यसम्भवश्रुतेः । अविद्याऽसम्भवात् तदुपादानाय कर्मणोऽपि अनुपपत्तिमवोचाम । "अमृतमश्नुत" इत्यापेक्षिकममृतं, "विद्या"शब्देन परमात्मविद्याग्रहणे "हिरण्मयेन" इत्यादिना द्वारमार्गादियाचनं अनुत्पन्नं स्यात्? तस्माद्, उपासनया समुच्चयो, न परमात्मविज्ञानेन, इति यथास्माभिर्व्याख्यात एव मन्त्रार्थ, इत्युपरम्यते ॥

इति श्रीगोविन्दभगवत्पादशिष्य श्रीशङ्करभगवतः कृतौ

वाजसनेयिसंहितोपनिषद्भाष्यं सम्पूर्णम्

# ॥ प्रमाणवचनानि ॥

## अत्र स्वीकृता सङ्केताः

| | |
|---|---|
| ऐ.उ. | ऐतरेयोपनिषत् |
| क.उ. | कठोपनिषत् |
| खं. | श्रीराघवेन्द्रयतिविरचितः खण्डार्थः |
| तै.आ. | तैत्तिरीय आरण्यक |
| तै.उ. | तैत्तिरीयोपनिषत् |
| टी. | श्रीजयतीर्थमुनिविरचिता टीका |
| नृ.वि. | श्रीनृसिंहाचार्यकृतं विवरणम् |
| छा.उ. | छाँदोग्योपनिषत् |
| प्र. | श्रीवादिराजयतिविरचिता प्रकाशिका |
| प्र.उ. | प्रश्नोपनिषत् |
| मु.उ. | मुण्डाको(आथर्वणो)पनिषत् |
| बृ.उ. | बृहदारण्यकोपनिषत् |
| ब्र.सू. | ब्रह्मसूत्राणि |
| भ.गी. | भगवद् गीता |
| भा. | श्रीमदानन्दतीर्थभगवत्पादाचार्यकृतं ईशावास्यभाष्यम् |
| भा.पु. | भागवत पुराण |
| शं.भा. | श्रीशङ्कराचार्यकृतं ईशावास्यभाष्यम् |
| श्वे.उ. | श्वेताश्वतरोपनिषत् |
| श्री.व्या. | श्रीनिवासाचार्यकृत व्याख्यानम् |

| | | |
|---|---|---|
| अग्नौ क्रियावतां विष्णुर्योगिनां हृदये हरिः | अनिर्दिष्ट स्मृतिः | प्र. २० |
| अज्ञस्य कर्म लिप्येत कृष्णोपास्तिमकुर्वतः | नारदीये | भा. २ |
| अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच | श्वे.उ. ६.२१ | शं.भा. ९ |
| अतिरोहितविज्ञानाद्वायुरप्यमृतः स्मृतः | रामसंहितायाम् | भा. १८ |
| अदृश्यत्वादिगुणको धर्मोक्तेः | ब्र.सू. १.२.२१ | प्र. २ |
| अध्वरे पशुं हिंस्याद् | अनिर्दिष्टम् | शं.भा. २० |
| अन चेष्टायाम् | धातुपाठः | प्र. १ |

| | | |
|---|---|---|
| अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः | भारते | प्र. १७ |
| अनेजन्निर्भयत्वात्तदेकं प्राधान्यतस्तथा | ब्रह्माण्डे | भा. ४ |
| अन्यथोपासका ये तु तमोऽन्धं यान्त्यसंशयम् | कौर्मे | भा. ९ |
| अयमिह सुमतिं वायुदेवो विदध्यात् | हरिवायुस्तुति ५ | प्र. १७ |
| अस भुवि | धातुपाठः | टी. १७ |
| अहं चासावहेयतः | ब्रह्माण्डे | भा. १७ |
| अहं ब्रह्मास्मि | बृ.उ. १.४.१० | प्र. १७ |
| आकाश एव तदोतं प्रोतं च | बृ.उ. ३.८.७ | टी. १ |
| आख्यास्ये भगवान् यज्ञो | भा.पु. ८.१.६ | श्री.व्या. १ |
| आत्मावास्यमिदं सर्वम् | भा.पु. ८.१.१० | श्री.व्या. १ |
| इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ | नारायणोपनिषत् | शं.भा. २ |
| ऋष ज्ञाने | धातुपाठः | भा. ४ |
| एतस्मिन्खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च | बृ.उ. ३.८.११ | टी. १ |
| एतादृशं ब्रह्मोपासीत | अनिर्दिष्टम् | प्र. ४ |
| एतेन मातरिश्वा व्याख्यातः | ब्र.सू. २.३.८ | खं. १८, नृ.वि. १८ |
| एजृ कम्पने | धातुपाठः | खं. ४, शं.भा. ४ |
| एवाह्येवैवाहि | अनिर्दिष्ट उपनिषत् | टी. ८ |
| एष्यच्च निश्चितं यत्तदतीतत्वेन भण्यते | नारदीये | प्र. ७ |
| कर्मणा पितृलोक | अनिर्दिष्ट श्रुतिः | शं.भा. ९ |
| कर्मण्येवाधिकारस्ते मा फलेषु कदाचन | भ.गी. २.४७ | प्र. २ |
| कामकारेण चैके | ब्र.सू. ३.४.१५ | टी. १४ |
| कालाध्वनोरत्यन्तसंयोगे | अष्टाध्यायी २.३.५ | खं. २ |
| किं प्रजया करिष्यामो येषाम् | बृ.उ. ४.४.२२ | शं.भा. ९ |
| केवलो निर्गुणः | श्वे.उ. ६.११ | शं.भा. ६ |
| को ह्येवान्यात् | तै.उ. २.७. | टी. १ |
| गुपू रक्षणे | धातुपाठः | प्र. १ |
| त इह व्याघ्रो वा सिंहो वा वृको वा | छा.उ. ६.९.३, ६.१०.२ | प्र. १७ |
| ततो बिभेति सर्वोऽपि न बिभेति हरिः स्वयम् | तत्त्वसंहितायाम् | भा. ५ |
| तत्त्वमसि | छा.उ. ६.८.७ इत्यादि | प्र. १७ |
| तत्सृष्ट्वा तदेवानुप्राविशद् | तै.उ. २.६.१ | टी. १ |

| | | |
|---|---|---|
| तदव्यक्तमाह हि | ब्र.सू. ३.२.२३ | प्र. २ |
| तद्यत्तत्सत्यमसौ स आदित्यो य एष | बृ.उ. ५.५.२ | शं.भा. १५ |
| तमेव भान्तमनुभाति सर्वम् | श्वे.उ. ६.१४, मु.उ. २.२.११ | प्र. २ |
| तं यथा यथोपासते तदेव भवति | शतपथ ब्रा. १०.५.२.२० | टी. ११ |
| तं हासुरा ऋत्वा विदध्वसुः | छा.उ. १.२.७ | प्र. १ |
| तेऽर्चिषमभिसम्भवन्ति | छा.उ. ५.१०.१ | प्र. २० |
| त्वद्दत्तया वयुनयेदमचष्ट विश्वम् | भा.पु. ४.९.८ | भा. २० |
| दशार्थाः सर्ववेदेषु | अनिर्दिष्टम् | प्र. १७ |
| दूरमेते विपरीते विषूची | क.उ. १.२.४ | शं.भा. २० |
| द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः | अनिर्दिष्ट स्मृतिः | शं.भा. २ |
| न च रमन्ति अहो | भा.पु. १०.९४.२४ | भा. २ |
| न हिंस्यात् सर्वा भूतानि | अनिर्दिष्टम् | शं.भा. २० |
| नान्यः पन्था | श्वे.उ. ३.८, तै.आ. ३.१२.१७ | टी. १४ |
| नान्योऽतोऽस्ति द्रष्टा | अनिर्दिष्ट श्रुतिः | शं.भा. ८ |
| नामानि सर्वाणि यमाविशन्ति | भाल्लवेयश्रुतिः | प्र. १७ |
| नित्यं नित्यात्मना यतः | अनिर्दिष्टम् | टी. १ |
| निन्दामि च पिबामि च | न्यायः | प्र. १७ |
| नियतस्य तु संन्यासः कर्मणो नोपपद्यते | भ.गी. १८.७ | प्र. २ |
| नियमाच्च | ब्र.सू. ३.४.७ | खं. २ |
| नियमेन तमो यान्ति सर्वेऽपि विमुखा हरौ | अनिर्दिष्टम् | भा. ३ |
| न्यास एवात्यरेचयद् | तै.आ. | शं.भा. २ |
| टु ओ श्वि गतिवृद्ध्योः | धातुपाठः | प्र. १ |
| पात्रं हिरण्मयं सूर्यमण्डलं समुदाहृतम् | ब्रह्माण्डे | भा. १५ |
| पुष पुष्टौ | धातुपाठः | टी. १५ |
| प्रधानज्ञानरूपतः | ब्रह्माण्डे | भा. १६ |
| ब्रह्माणमीशं कमलासनस्थम् | भ.गी. ११.१५ | प्र. ६ |
| ब्राह्मणो न हन्तव्य | अनिर्दिष्ट श्रुतिः | प्र. १७ |
| भक्तानां स्मरणं विष्णोर्नित्यज्ञप्तिस्वरूपतः | ब्रह्मतर्के | भा. १९ |
| भीषाऽस्माद्वातः पवते | तै.उ. २.८ | शं.भा. ४ |
| भुजोऽनवन | अष्टाध्यायी १.३.३६ | प्र. २ |
| मन एवास्याऽत्मा वाग्जाया | बृ.उ. १.४.१७ | शं.भा. ९ |
| महादुःखैकहेतुत्वात् प्राप्यत्वादसुरैस्तथा | वामने | भा. ३ |
| माङ् मान | धातुपाठः | टी. १७ |

| | | |
|---|---|---|
| मायायवनिकाच्छन्नमहिम्ने ब्रह्मणे नमः | अनिर्दिष्टम् | प्र. २ |
| य आत्मा सर्वान्तर | अनिर्दिष्ट श्रुतिः | शं.भा. ५ |
| य एवायं मुख्यप्राणस्तमुद्गीथमुपासाञ्चक्रिरे | छा.उ. १.२.७ | प्र. १७ |
| यत्तदद्रेश्यमग्राह्यम् | मु.उ. १.१.६ | प्र. २ |
| यदस्मान् कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय | स्कान्दे | भा. २० |
| यदादित्यगतं तेजो जगद्भासयतेऽखिलम् | भ.गी. १५.१२ | प्र. २ |
| यस्मिन् सर्वाणि भूतानि स आत्मा सर्वभूतगः | पिप्पलादशाखायाम् | भा. ७ |
| युयु वियोगे | धातुपाठः | भा. २० |
| ये विदुः स ह सज्जनाः | कौर्मे | भा. ११ |
| यो नः पिता | ऋग्वेद १०.८२.३० | प्र. १७ |
| यो वेद संहृतिज्ञानाद्देहबन्धाद्विमुच्यते | कौर्मे | भा. १४ |
| यो ह वा अविदितार्षच्छन्दोदैवतब्राह्मणेन | अनिर्दिष्ट श्रुतिः | टी. १ |
| वर्तमाने लट् | अष्टाध्यायी ३.२.१२३ | प्र. १७ |
| विद्यया तदारोहन्ति | अनिर्दिष्ट श्रुतिः | शं.भा. ९ |
| विद्यया देवलोक | अनिर्दिष्ट श्रुतिः | शं.भा. ९ |
| विरक्तः कामभोगेषु शतरूपापतिः प्रभुः | भा.पु. ८.१.७ | श्री. व्या. १ |
| व्यत्ययो बहुळम् | अष्टाध्यायी ३.१.८५ | प्र. १ |
| व्रण सञ्चूर्णन | धातुपाठः | टी. ८ |
| शम्भोः पितामहो ब्रह्मपिता शक्राद्यधीश्वर | अनिर्दिष्टम् | प्र. १७ |
| शुक्रं तच्छोकराहित्यादव्रणं नित्यपूर्णतः | वाराहे | भा. ८ |
| स एष मृत्युश्चैवामृतं च | ऐ.उ. २.१.८ | नृ.वि. १८ |
| स प्राणमसृजत | प्र.उ. ६.४ | नृ.वि. १८ |
| सत्यं ज्ञानमनन्तं ब्रह्म | तै.उ. २.१.१ | प्र. ४ |
| सम्भोगप्राप्तिरितिचेन्न वैशेष्यात् | ब्र.सू. १.२.८ | नृ.वि. १८ |
| सर्वगं परमात्मानं सर्वं च परमात्मनि | सौकरायणश्रुतिः | भा. ६ |
| सुपां सुलुक् | अष्टाध्यायी ७.१.३९ | प्र. १९ |
| सूर्यकोटिप्रतीकाशम् | अनिर्दिष्ट स्मृतिः | प्र. १७ |
| सृष्टिकर्तृत्वं नाङ्गीकुर्वन्ति ये हरेः | कौर्मे | भा. १२ |
| सोऽकामयत जाया मे स्याद् | बृ.उ. १.४.१७ | शं.भा. ९ |
| स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदम् | ब्राह्मे | भा. १ |
| स्वायम्भुवं स्वदौहित्रं विष्णुम् | ब्रह्माण्डे | भा. १ |
| स्वार्थिको णिज् | अनिर्दिष्टम् | प्र. १ |